दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लदशमी
भाद्रपद 06 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-10 ■ वर्ष-5 ■ अङ्क-303 | 1 | अगस्त 22, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

1 अन्तरिक्ष-स्टार्टअप-संस्थापकैः सह प्रधानमन्त्रिणः मोदी-महोदयस्य संवादः

3 HP VIDHANSABHA SESSION- प्रावृट्- सत्रस्य प्रथमे एव दिने कोलाहलः, 'वन्दे मातरम्' इत्यधिकृत्य सदने संजातः महद्-आक्रोशः

10 उत्तरप्रदेशवार्ता संस्कृतसामान्यज्ञान-संस्कृतगीतप्रतियोगितयोः प्रतिभाभिः प्रदर्शिता मेधा

## भारतीय-नाविक-समुदायस्य कल्याणम् सुरक्षां च भारतस्य उच्चप्राथमिकता अस्ति इति सर्वकारः पुनरुद्घाटयत्



भारतीय-नाविक-समुदायस्य कल्याणम् सुरक्षां च भारतस्य उच्चप्राथमिकता अस्ति इति सर्वकारः पुनरुद्घाटयत्। नवदेहली-नगरे प्रसारमाध्यमान् सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् भारतं पश्चिमएशियायाः विकासान् निकटतया निरीक्षमाणम् अस्ति। विदेशीय ध्वजयुक्तयोः नौकयोः घटनायाः विषये कथयन् जैसवालः अवदत् यत् सर्वे द्वाविंशति नाविकाः सुरक्षिताः सन्ति, तेषां सुरक्षायै कल्याणाय च विषयेऽस्मिन् सम्बद्धः अधिकारिभिः सह सर्वकारः सम्पर्क कुर्वन् अस्ति । सेनाध्यक्षस्य जनरल धीरज सेठ इत्यस्य नेपालयात्रायाः विषये प्रवक्ता अवदत् यत् तस्य भ्रमणकाले सेनाप्रमुखाय मानद-जनरल-पदम् प्रदत्तम् आसीत् । सः अवोचत् यत् एतत् द्वयोः देशयोः सशस्त्रसेनायाः च मध्ये दीर्घकालिनं मैत्रीम् प्रतिबिम्बयति। विदेशमन्त्रालयस्य सचिवस्य श्रीप्रिया रङ्गनाथन् इत्यस्याः फिलिस्तीन-देशयात्रायाः विषये, विदेशमन्त्रालयस्य प्रवक्ता अवदत् यत् तस्याः यात्रायाः समये सा तत्रत्याय दृढविकासाय सहभागि भवितुं भारतस्य प्रतिबद्धतां प्रकटितवती इति। सः इत्यपि अवदत् यत् सचिवः फिलिस्तीन देशस्य जनानां स्वास्थ्यस्य आवश्यकतायै जीवनरक्षक औषधान्यपि समर्पितवान् ।

## अद्यतनीयं सुभाषितम्

**सत्सङ्गात् जायते ज्ञानं, ज्ञानाद्धर्मः प्रवर्तते।**
**धर्मादर्थश्च कामश्च, मोक्षश्चैव प्रजायते॥**
**(मार्कण्डेय पुराण, मदालसा-अलर्क संवाद)**

भावार्थः- सत्संग से ज्ञान उत्पन्न होता है, ज्ञान से धर्म और धर्म से अर्थ, काम तथा अंततः मोक्ष की प्राप्ति होती है। अतः सत्संगति करनी चाहिए।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## केन्द्रीय-गृह-मन्त्री अमितशाहः पश्चिमबङ्गालस्य सिलिगुडी-नगरे सशस्त्र-सीमा-बलस्य मुख्यालये अनेकानां परियोजनानां उद्घाटनम्, शिलान्यासञ्च कृतवान्



केन्द्रीय-गृह-मन्त्री अमितशाहः पश्चिमबङ्गालस्य सिलिगुडी-नगरे सशस्त्र-सीमा-बलस्य मुख्यालये प्रायः नवसप्तत्यधिकैकशत- कोटि-रूप्यकाणां अनेकानां परियोजनानां उद्घाटनम्, शिलान्यासञ्च कृतवान्। समारोहानन्तरं कार्मिकान् सम्बोधयन् गृहमन्त्री अवदत् यत् यदा भाजपा-सर्वकारः केन्द्रे सत्तां प्राप्नोत्, सीमा-सुरक्षार्थं उत्तरदायिनां कर्मचारिणां कल्याणाय सर्वोच्चप्राथमिकता दत्तास्ति। सः अधोरेखितवान् यत् एस्. एस्. बीति बलम् नेपाल-भूटान् इत्यादिभिः देशैः सह मुक्तसीमायाः रक्षणस्य समाह्वनपूर्णं कार्यं निर्वहति, एतत् कठिनतमेषु कर्तव्येषु अन्यतमम् इति सः उक्तवान्। अपि च, सः उल्लिखत् यत् सिलिगुडी-मार्गस्य महत्त्वं अवगन्तुं केन्द्रसर्वकारेण अस्मिन् प्रदेशे निरीक्षणं प्रवर्धितम् अस्ति ।

## झारखण्ड-उच्चन्यायालयेन जे. एस्. एस्. सी. सी. जी. एल्. अथ सी. डी. पी. ओ. परीक्षाभ्यः नियुक्ति-निरसनस्य राज्य-सर्वकारस्य आदेशस्य विषये अन्तरीम-स्थगनम् अस्थापयत्




झारखण्ड-उच्चन्यायालयेन जे.एस.एस.सी. सी. जी. एल्. अथ सी. डी. पी. ओ. परीक्षाभ्यः नियुक्ति-निरसनस्य राज्यसर्वकारस्य आदेशस्य विषये अन्तरीम-स्थगनम् अस्थापयत् । याचकाः न्यायालयस्य पुरतः तर्कं कृतवन्तः यत् विज्ञापनानि नियुक्तयश्च आकस्मिकरूपेण निराशनात्मकः सर्वकारस्य निर्णयः विहितनियमानां अनुरूपः नासीत्। न्यायालयेन अस्मिन् विषये अग्रिमस्य विचारणायाः दिनाङ्कः सितम्बरमासे निर्धारितोऽस्ति । उच्चन्यायालयेन, एकदिवसपूर्वमपि जे. पी. एस्. सी. नियुक्ति-निरस्तस्य राज्यसर्वकारस्य आदेशस्य विषये अपि अन्तरीम-स्थगनम् स्थापितमासीत्। परीक्षाणां निरस्तीकरणार्थं षड्विंशति दिनानि यावत् आन्दोलनं कृतवन्तः छात्राः आरोपयन् यत् सर्वकारः समुचितं विधि-परामर्श विनैव निर्णयम् अघोषयदिति।

## भारत-प्रशासनं चल-दूरवाणी-निर्माण MPMS इत्यस्याः पञ्चशतोत्तर-द्विषष्टि-सहस्र- कोटि-रूप्यकाणां योजनायाः उद्घाटनम् अकरोत्




सूचना-प्रौद्योगिकी-केन्द्रीयमन्त्री अश्विनी वैष्णवः चल-दूरवाणी-निर्माण-योजनायाः - MPMS इत्यस्याः उद्घाटनम् अकरोत्। केन्द्रीय-मन्त्रिमण्डलेन गत-मासे पञ्चशतोत्तर-द्विषष्टि-सहस्र- कोटि-रूप्यकाणां व्यय-विनियोगेन सह एषा योजना अङ्गीकृता आसीत्।

## ईरान-देशः स्व-देशं विरुध्य दत्तान् आर्थिक प्रतिबन्धान् निराकर्तुं उक्तवान् यत् एतादृश्यः विफल-नीतयः ईरान-जनेषु अधिकां शत्रुतां जनयिष्यन्ति।

ईरान-देशस्य विदेश मन्त्री श्रीअब्बास-अरागची इत्येषः स्व-देशं विरुध्य दत्तान् आर्थिक-प्रतिबन्धान् निराकुर्वन् उक्तवान् यत् एतादृश्यः विफल-नीतयः ईरान-जनेषु अधिकां शत्रुतां जनयिष्यन्ति, अधिकां विफलताम् च आनेष्यन्ति । अरागची-इत्यस्य इमाम् टिप्पणीं ट्रम्पेन ईरान-विरुद्ध कठोर आर्थिक पदक्षेपोत्थापनरूपेण स्वीकृतम्।

# सर्वोच्चन्यायालयेन विधि-अभ्यासस्य आवश्यकताम् एकवर्षं यावत् न्यूनीकृतमस्ति



सर्वोच्चन्यायालयेन स्वस्य पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य मई-मासिक-निर्णये परिवर्तनं कृत्वा, प्रवेश-स्तरीय-न्यायिक सेवा परीक्षासु भागं ग्रहीतुं विधि-स्नातकानां कृते पूर्वतनस्य अनिवार्य-त्रिवर्षीय विधि-अभ्यासस्य आवश्यकतां एकवर्षं यावत् न्यूनीकृतमस्ति । मुख्यन्यायाधीशः सूर्यकान्तः, न्यायमूर्ती ए.जी. मसिहः, के. विनोदचन्द्रन् च इत्येतैः मिलित्वा मतद्वयस्य प्रत्युत्तरे एकेति विभक्तनिर्णये, समीक्षा-याचिकां निराकृत्य एतदुक्तम्।

## नवदेहल्यां सी. आई. आई. ग्लोबल मेड्टेक इत्याख्यं शिखरसम्मेलनं सम्बोधितवान् औषध-विभाग-सचिवः मनोजजोशी




औषध-विभाग-सचिवः मनोजजोशी चिकित्सा उपकरण-उद्यमम् आग्रहयत् यत् भारतस्य विनियामक संरचनायाः निर्माणे बृहत्तरं निवेशं प्रदातव्यम् , नवदेहल्यां सी. आई. आई. ग्लोबल मेड्टेक इत्याख्यं शिखरसम्मेलनं सम्बोधयन् श्रीजोशीवर्यः अवदत् यत् विनियामक-चर्चासु उद्योगस्य सहभागिता सम्प्रति परिमिता अस्ति। श्रीजोशी चिकित्सा-उपकरण-विन्यासानां, समाप्त-उत्पादानां च दृढतर-परीक्षणस्य आवश्यकताम् अपि अधोरेखितवान्।

## वाणिज्य-उद्योग-मन्त्री पीयूष गोयलस्य सिंगापुर यात्रा



वाणिज्य-उद्योग-मन्त्री पीयूष गोयलः सिंगापुर-देशेन सह समग्र एशिया-खण्डेन सह आर्थिक - सहयोगं प्रगाढीकर्तुं, व्यवसाय-स्तरे परस्पर सहयोगं दृढीकर्तुं च भारत-देशस्य प्रतिबद्धतायाः विषये बलं दत्तवान्। तेन "प्रधानमन्त्री नरेन्द्र मोदी-महोदयस्य नेतृत्वे 'ईज़-ऑफ डूइंग बिज़नेस' इति व्यवस्थायाः सुदृढीकरणाय सर्वकारस्य प्रयत्नाः च प्रकाशिताः। श्रीगोयलः सिंगापुर-देशस्य विदेश व्यापार-उद्योग-राज्यमन्त्रिणा श्रीगैन-सियो-हुआंगेन सह अन्यैः च गणमान्य व्यक्तिभिः सह अपि मिलितवान्।

# पुणे-नगरे आयोजितस्य द्वादश-ब्रिक्स-सम्प्रेषण-मन्त्रिणां सभायां दूरसञ्चार-सूचना-सञ्चार-तन्त्रज्ञानक्षेत्रादिषु सहकारं प्रगाढीकर्तुं भारत-ब्राज़ीलदेशौ सन्धि-पत्रे हस्ताक्षरं कृतवन्तौ



दूरसञ्चार- सूचना-सञ्चार-तन्त्रज्ञानक्षेत्रादिषु सहकारं प्रगाढीकर्तुं भारत-ब्रजिल्-देशौ सहमति-पत्रे हस्ताक्षराणि अकुरुताम्। सामाजिक-प्रसार माध्यमे, दूरसञ्चार-विभागः अवदत् यत् एषा सन्धिः डिजिटल्-नवान्वेषणस्य प्रगत्या सह डिजिटल्-आधारिकसंरचनायाः सुदृढीकरणञ्च करिष्यति, उदयोन्मुखप्रौद्योगिकीनां सहकारं च वर्धयिष्यति। पुणे-नगरे आयोजितस्य द्वादश- ब्रिक्स्-सम्प्रेषण-मन्त्रिणां सभायाः पार्श्वे केन्द्रीय-सम्प्रेषण-मन्त्रिणा ज्योतिरादित्य माधव-सिन्धिया इत्यनेन ब्राज़िल्-देशस्य सम्प्रेषण-मन्त्रिणा फ्रेडरिको-डी-सिक्वीरा-फिल्हो-वर्येण च एम्. ओ. यू. इत्यस्मिन् हस्ताक्षरं कृतम्। केन्द्रीयमन्त्री सिन्धिया एकस्मिन् प्रसारसन्देशे उक्तवान् यत् एम्. ओ. यू. इत्यनेन सार्वत्रिक सम्पर्कः, साइबर सुरक्षा, डिजिटल-सार्वजनिक-आधारिकसंरचना, उदयोन्मुख प्रौद्योगिकीः, क्षमता-निर्माणम्, उत्तम-आचरणानां आदानप्रदानम् इत्यादिषु विषयेषु वैपाक्षिक सहयोगः गहनः भविष्यतीति। सः उक्तवान् यत्, सुरक्षित-समावेशयुताय डिजिटलेति भविष्याय भारत-ब्राज़िल-सहयोगस्य सुदृढीकरणार्थं दृढं पदम् अस्ति इति। आयोजनस्यास्य अध्यक्षः केन्द्रीय-सम्प्रेषण-मन्त्री ज्योतिरादित्यसिन्धिया स्वस्य प्रारम्भिक भाषणे भारतस्य भविष्यस्य विषये दृष्टिं निरूपयन् उक्तवान्, यत् प्रधानमन्त्री नरेन्द्र मोदी-वर्यस्य डिजिटल्-इण्डिया इत्यभियानं प्रति प्रतिबद्धतया मार्गदर्शितं स्थितिस्थापकम्, विश्वसनीयम्, नवान्वेषिणं, सशक्तीभूतं, सर्वसमावेशयुतञ्च भवतीति भारतस्य दृष्टिकोणम् अधोरेखितवान्।

## भारत-ऋतु-विज्ञान-विभागः पूर्व-मध्य-प्रदेशे अत्यधिक वर्षायै "नारङ्ग-संचेतनां" प्रख्यापितवान्

भारतस्य काजल-ढोचक-नाम्नी द्वन्द्व युद्धक्रीडिका क्रमशः द्वितीयवारम् अन्तः विंशतिवर्षीयानां विश्व-द्वन्द्व युद्ध-स्पर्धायां स्वर्णपदकं प्राप्तवती।

भारतस्य काजल-ढोचक-नाम्नी द्वन्द्व-युद्धक्रीडिका क्रमशः द्वितीयवारम् अन्तः विंशतिवर्षीयानां विश्व-द्वन्द्व युद्ध-स्पर्धायां स्वर्णपदकं प्राप्तवती। सा निर्णायक द्वन्द्वे चीन-देशीयां जिंगरू सन्-नाम्नीं क्रीडिकां सप्त-शून्याङ्कैः पराजित्य षट्सप्तति-किलोग्राम-वर्गे सुवर्ण पदकं लब्धवती ।



# अन्तरिक्ष-स्टार्टअप-संस्थापकैः सह प्रधानमन्त्रिणः मोदी-महोदयस्य संवादः

हिमसंस्कृतवार्ता,नवदेहली

नवदेहल्यां प्रधानमन्त्री नरेन्द्रमोदी अन्तरिक्ष-क्षेत्रेण सह सम्बद्धानां विंशतेः (२०) स्टार्टअप-संस्थानां मुख्य-कार्यकारी-अधिकारिभिः (सी.ई.ओ.) संस्थापकैश्च सह संवादमकरोत्। प्रधानमन्त्रिणा जनसामान्यस्य जीवनस्तरमुन्नतं विधातुं व्यापकस्तरे अन्तरिक्ष-प्रौद्योगिक्याः उपयोगार्थम् आह्वातः। सः अकथयत् यत् भारतस्य अन्तरिक्ष-क्षेत्रं वैश्विक-प्रतिभायाः, उद्यमानां, विदेशी-निवेशस्य च प्रमुखम् आकर्षणकेन्द्रं भवितुमर्हति।

**प्रमुख-विन्दवः:**

- वैश्विक-प्रतिष्ठायाः निर्माणम्: प्रधानमन्त्रिणा ईदृशस्य पर्यावरणस्य (इकोसिस्टम) निर्माणार्थं परामर्शः दत्तः, यत्र अन्तरिक्षविषयके विमर्शे सति विश्वस्य ध्यानं भारतं प्रति गच्छेत्। सः युवानां मध्ये जिज्ञासां संवर्धयितुम् 'अटल-टिंकरिंग-प्रयोगशालाभिः' सह सहयोगं कर्तुं प्रेरयत्।
- उद्यमिनां साहसोत्साहवर्धनम्: श्रीमोदी नूतनक्षेत्रे साहसं प्रदर्शयितुं नेतृत्वाय च अन्तरिक्ष-उद्यमिनः अभिनन्दितवान्। सः अवदत् यत् निजीक्षेत्राय अन्तरिक्ष-द्वारोद्घाटनस्य दृष्टिकोनः एतेषां विश्वासेन दृढीकृतः।
- विंशतेः स्टार्टअप-संस्थानां सहभागिताः अस्मिन् सम्मेलने स्काईरूट एयरोस्पेस, अग्निकुल कॉसमॉस, पिक्सल, ध्रुव स्पेस, गैलेक्सी, पियरसाइट, बेलाट्रिक्स एयरोस्पेस, दिगन्तरा इत्यादीनां प्रमुख-स्टार्टअप-संस्थानां संस्थापकाः उपस्थिताः आसन्। तैः सर्वकारस्य नीतीनां भूरिशः प्रशंसा कृता तथा च स्वाभिलाषाः प्रदर्शिताः।
- जनजीवने उपयोगः: प्रधानमन्त्रिणा कृषिक्षेत्रे, पशुधन-प्रबन्धने, दुग्धोद्योगे, पर्यावरणसंरक्षणे च अन्तरिक्ष-प्रौद्योगिक्याः उपयोगाय स्टार्टअप-संस्थाः अनुनूताः।
- सर्वकारस्य आश्वासनम्: सामाजिकमाध्यमे श्रीमोदी न्यवेदयत् यत् एतेषां युव-उद्यमिनां कठोरश्रमेण देशेन महत्यः उपलब्धयः प्राप्ताः। सः आश्वस्तवान् यत् भविष्यस्य क्षमता-निर्माणे सर्वकारः तैः सह सदैव तिष्ठति, भारतं च विश्वस्य सम्मुखे एकम् अभिनवं व्यावहारिकं च आदर्शं प्रस्तोष्यति।

# हिमाचलस्य काङ्गड़ा-जनपदे एकोनविंशति- वर्ष- पर्यन्तानां युनां कृते प्रदास्यते कृमिनाशकौषधम्, सज्जीकरणे संलग्नः स्वास्थ्य-विभागः



**हिमसंस्कृतवार्ताः- काङ्गड़ा।** राष्ट्रिय- कृमि- मुक्ति- दिवसस्य २०२६ सफल-आयोजनाय उपायुक्तकार्यालये काङ्गड़ा- मण्डल- स्वास्थ्य- विभागेन मण्डल-स्तरीय-कार्यदलस्य उपवेशनम् आयोजितम्। उपवेशनस्य अध्यक्षताम् अतिरिक्त- उपायुक्तः काङ्गड़ा विनयकुमारः अकरोत्। राष्ट्रिय- कृमि- मुक्ति- दिवसस्य आयोजनम् १८ सितम्बर दिनाङ्के भविष्यति।

उपवेशने मण्डल-स्वास्थ्य-अधिकारी डॉ. राजेश सूदः, मण्डलकार्यक्रम-अधिकारी डॉ. दुष्यन्तः, प्रदीपपटियालः, उप-मण्डल- प्रारम्भिक- शिक्षाधिकारी अश्वनीकुमारः, उपनिदेशकः प्रारम्भिकशिक्षा बलविन्द्रसिंहः सहिताः विविधविभागानाम् अधिकारिणः उपस्थिताः आसन्। अतिरिक्त- उपायुक्तेन विनयकुमारेण सर्व- सम्बद्ध- विभागेभ्यः अभियानस्य सफलसञ्चालनाय परस्परसमन्वयेन कार्यं कर्तुं निर्देशाः दत्ताः। सः पालकेभ्यः, शिक्षकेभ्यः, बाल- विकासकेन्द्र- कार्यकर्तृभ्यः (आङ्गनवाडी), समुदायस्य सदस्येभ्यश्च सक्रिय-सहयोगाय न्यवेदयत्।

### ३.७२ लक्ष-बालकेभ्यः औषध-वितरणस्य लक्ष्यम्

अतिरिक्त-उपायुक्तः विज्ञापितवान् यत् राष्ट्रिय- कृमिमुक्ति- दिवसे एकतः एकोनविंशति- वर्षपर्यन्तस्य (१ तः १९ वर्षाणि) आयु-वर्गस्य बालकेभ्यः विद्यालयानाम् आङ्गनवाडी-केन्द्राणां च माध्यमेन कृमिनाशकम् औषधं प्रदास्यते, यदा च द्वि- तः पञ्च-वर्षपर्यन्तस्य बालकेभ्यः 'विटामिन-ए' इत्यस्य मात्रा दास्यते। तेन प्रोक्तं यत् प्रशासनस्य एषः यत्नः यत् प्रत्येकः बालकः अस्मिन् अभियाने समाविष्टः भवेत्।

काङ्गड़ा-मण्डले प्रायः त्रि-लक्ष-द्विसप्तति-सहस्र (३,७२,०००) योग्य-बालकेभ्यः कृमिनाशकौषध- प्रदानाय लक्ष्यं निर्धारितम् अस्ति। कृमि-मुक्तिः एका सुरक्षिता प्रभावशालिनी च स्वास्थ्य-योजना अस्ति, या बालकानां पोषणे, रोग- प्रतिरोधक- क्षमतायां, समग्रविकासे च महद्-योगदानं करोति।

मण्डल-स्वास्थ्य-अधिकारिणा डॉ. राजेशसूदेन सज्जीकरणानां विवरणं दत्तम्। मण्डल- कार्यक्रम- अधिकारिणा डॉ. दुष्यन्तेन उक्तं यत् १८ सितम्बर दिनाङ्के विद्यालयगामिभ्यः बालकेभ्यः 'एल्बेन्डाजोल' औषधस्य मात्रा दास्यते। पञ्चवर्षेभ्यः न्यूनवयस्केभ्यः बालकेभ्यः 'विटामिन- ए' अपि प्रदास्यते। एषा सम्पूर्ण-प्रक्रिया प्रशिक्षित- कर्मचारिणां सम्मुखे सुरक्षा-नियमानां पालनेन सह सम्पन्ना भविष्यति।

## HP VIDHANSABHA SESSION- प्रावृट्- सत्रस्य प्रथमे एव दिने कोलाहलः, 'वन्दे मातरम्' इत्यधिकृत्य सदने संजातः महद्- आक्रोशः

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश- विधानसभायाः द्वादशसत्रस्य प्रथमे एव दिने शुक्रवासरे सदने महती अशान्तिः सञ्जाता। सदनस्य कार्यविधेः प्रारम्भे राष्ट्रगीतस्य 'वन्दे मातरम्' इत्यस्य अगानेन विपक्षस्य विधायकाः विरोधं प्राकटयन्। अस्मिन् विषये विधानसभाध्यक्षः कुलदीपसिंहपठानिया-महोदयः अवदत् यत् एतदर्थं निर्मितः नियमः (विधिः) विधानसभायां प्रवृत्तः न भवति, अपि तु सर्वकारीय-संस्थासु प्रवृत्तः अस्ति। अनेनैव कारणेन विपक्ष-सदस्याः क्रुद्धाः अभवन्। विधानसभाध्यक्षेण उक्तं यत् विधानसभायाः एषा परम्परा वर्तते यत् राष्ट्रगानेन सदनस्य आरम्भः विधीयते, सत्र-समापने च 'वन्दे मातरम्' गीयते। विपक्षदलेन विरोधस्य अनिवर्तनात् विधानसभाध्यक्षेण सदनस्य कार्यविधिः एक-दिवसाय स्थगिता।अस्मात् पूर्वं सत्र-प्रारम्भात् प्राक् विपक्षेण विधानसभायां विपक्ष-कक्षस्य बहिः विरोध-प्रदर्शनं कृतम्। भारतीय-जनता-पक्षस्य (भाजपा) नेता विधायकश्च रणधीरशर्मा न्यवेदयत् यत् वर्त्तमान- काङ्ग्रेस- सर्वकारस्य जनविरोधि-नीतीनां विरुद्धम् एतत् प्रदर्शनं कृतम् अस्ति। भाजपा-विधायकाः हस्तेषु पट्टिकाः प्रसारफलकानि च धृत्वा विधानसभापरिसरे उद्घोषान् अकुर्वन्। विपक्षेण पञ्चलक्ष- युवकेभ्यः वृत्तिप्रदानस्य प्रतिज्ञा असत्या इति प्रतिपादिता। अपरपक्षे विपक्षनेता जयरामठाकुरः देहलीं प्रति प्रस्थितवान्।

## HP NEWS- 'एनएचएम' बाह्य- स्रोत- कर्मचारिणां वर्धितं मानदेयम्; एताभ्यः पञ्च-श्रेणीभ्यः लप्स्यते लाभः




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे राष्ट्रिय- स्वास्थ्य- अभियानस्य अन्तर्गतं बाह्य- स्रोत- आधारेण सेवां यच्छतां कर्मचारिणां मानदेये वृद्धिः कृता। अभियानेन परिचारिकायाः (उपचारिकायाः), औषध-प्रदातृणां (फार्मासिस्ट), प्रयोगशाला-तन्त्रज्ञानां (लैब तकनीशियन), शल्यक्रिया- कक्ष- सहायकानां मासिकमानदेयं पञ्चविंशति- सहस्ररूप्यकाणि (२५,०००) निर्धारितम्। तत्रैव दत्त-प्रविष्टि-सञ्चालकाय (डाटा एण्ट्री ऑपरेटर) अधुना प्रतिमासम् अष्टादश- सहस्र- रूप्यकाणि (१८,०००) मानदेयं प्राप्स्यते। संशोधितानि वेतनानि १ सितम्बर २०२६ दिनाङ्कात् प्रवर्तिष्यन्ते। राष्ट्रिय- स्वास्थ्य- अभियानस्य अभियान- निदेशकेन अस्मिन् विषये आदेशाः प्रसारिताः। हिमाचलप्रदेश- स्वास्थ्य- परिवार- कल्याण- समित्याः अधिशासी-निकायस्य (प्रशासक- मण्डलस्य) उपवेशने स्वीकृतस्य निर्णयस्य, २०२६-२७ वर्षाय भारत-सर्वकारस्य स्वास्थ्य-परिवार-कल्याण-मन्त्रालयात् प्राप्तायाः अनुमतेः अनन्तरम् एषः निर्णयः स्वीकृतः। आदेशस्य प्रतिलिपयः राज्य-सर्वकारस्य स्वास्थ्य- सचिवाय, स्वास्थ्य-सेवा-निदेशकाय, सर्वेभ्यः मुख्य- चिकित्साधिकारिभ्यः, राष्ट्रिय- स्वास्थ्य- अभियानस्य संयुक्त-नियन्त्रकाय, सर्वेभ्यः खण्ड- चिकित्साधिकारिभ्यश्च आवश्यक-कार्यानुष्ठानाय प्रेषिताः। अधुना स्वास्थ्यविभागेन राष्ट्रिय- स्वास्थ्य- अभियानेन च सम्बद्धैः संस्थानैः १ सितम्बरतः संशोधित-मानदेयानुसारं कर्मचारिभ्यः धन-प्रदानं सुनिश्चितं कर्तव्यं भविष्यति।

## मुख्यमन्त्री सुक्खूमहोदयः अवदत्- राष्ट्रगानस्य अपमानं कृत्वा भाजपाविधायकैः कृतः अपराधः

हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खूमहोदयः शुक्रवासरे विधानसभापरिसरे राष्ट्रगानम् अधिकृत्य भारतीय- जनता- पक्षस्य (भाजपा) विधायकानाम् उपरि तीक्ष्णं प्रहारम् अकरोत्। तेन प्रोक्तं यत् विधानसभाध्यक्षस्य पक्षतः राष्ट्रगानाय सदने सर्वेभ्यः उत्थातुं निवेदितम् आसीत्, किन्तु भाजपा- विधायकाः राष्ट्रगानस्य प्रारम्भात् पूर्वमेव राष्ट्रगीतविषये पृच्छन्तः आसन्। मुख्यमन्त्रिणा उक्तं यत् विधानसभाध्यक्षेण पूर्वमेव स्पष्टीकृतम् आसीत् यत् सदने पूर्वम् अपि राष्ट्रगानं गीयते स्म। राष्ट्रगानं देशस्य गरिम्णा सम्मानेन च सम्बद्धः विषयः अस्ति, अस्य च अपमानं कस्यामपि स्थितौ न सोढव्यम्।

मुख्यमन्त्रिणा प्रोक्तं यत् स्वातन्त्र्यानन्तरं ७७-७८ वर्षेभ्यः राष्ट्रगानं गीयते। अधुना भाजपा- विधायकाः अस्य विरोधं कुर्वन्ति। प्रधानमन्त्री नरेन्द्रमोदी अपि स्वयं राष्ट्रगानं गायति। विद्यालयेषु अपि राष्ट्रगानं गीयते, सदने च राष्ट्रगीतं पूर्ण- सम्मानेन गीयते। एवं सति राष्ट्रगानमधिकृत्य विवादस्य सङ्गमः दुर्भाग्यपूर्णः अस्ति। हिमाचलस्य जनता काङ्ग्रेसदलञ्च राष्ट्रगानस्य अस्य तथाकथित- अपमानस्य विरोधे स्तः। अयम् विषयः प्रदेशस्य जनतायाः सम्मुखं नेष्यते। राष्ट्रगानस्य राष्ट्रगीतस्य च उभयोः स्वकीयं स्थानं सम्मानं च वर्तते। सदने उभौ पूर्ण-गरिम्णा गीयते, अत्र च कस्यापि प्रकारस्य राजनीतिः न भवेत्। सदने सर्वेषां राजनैतिक-दलानां स्व-मतानि विचाराश्च भवितुं शक्नुवन्ति, किन्तु राष्ट्रेण राष्ट्रियप्रतीकैश्च सम्बद्धेषु विषयेषु मर्यादायाः पालनं कर्तव्यम्।

### शोक-प्रस्तावे संवेदनहीनतायाः आरोपः

धन-सङ्ग्रह-स्तेयम्, प्रवेशपरीक्षा-प्रश्नपत्र-प्रकटनं, भ्रष्टाचारं च उल्लिखन् सः अवदत् यत् एतेषु विषयेषु चर्चा भवितव्या। मुख्यमन्त्रिणा विधानसभायाः भूतपूर्वविधायकानां दिवङ्गते सति शोक-संवेदनायाः अप्रकटनम् अधिकृत्य अपि भाजपादलस्य उपरि लक्ष्यं साधितम्।

# हिमाचल-विधानसभा-सत्रम्: 'वन्दे मातरम्' विषये सदने तीव्रः कोलाहलः, कार्यप्रणाली शनिवासरस्य प्रातः एकादशवादनपर्यन्तं स्थगिता



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेश-विधानसभायाः द्वादशं सत्रम् अद्य राष्ट्रगानेन सह प्रारब्धम्। किन्तु वर्षाकालीन-सत्रस्य प्रथमः एव दिवसः कोलाहलेन ग्रस्तः जातः। सदनस्य कार्यप्रणाल्याः आरम्भे राष्ट्रगीतस्य 'वन्दे मातरम्' इत्यस्य अगानस्य विषये विपक्षीय-विधायकैः विरोधः कृतः। विधानसभाध्यक्षः कुलदीप सिंह पठानिया अकथयत् यत् अस्मिन् विषये निर्मितः नियमः विधानसभायां न, अपि तु सर्वकारीय- संस्थासु प्रवर्तते। ततः परं विपक्षः क्रुद्धः अभवत्। अध्यक्षः कुलदीप सिंह पठानिया पूर्वविधायकानां निधने शोकोद्गारार्थं संवेदनाः प्रकटयितुम् अवदत्। सः अकथयत् यत् अधुना शोकोद्गारः भविष्यति, एवंविधा नूतना परम्परा स्थापयितुम् उचिता नास्ति। अध्यक्षः अवदत् यत् विधानसभायाः परम्परा अस्ति यत् राष्ट्रगानेन आरम्भः क्रियते, समापने च 'वन्दे मातरम्' गीयते। कोलाहले प्रवर्धिते अध्यक्षः कार्यस्थगनस्य चेतावनीम् अददात्। विपक्षे अशान्ते सति अध्यक्षेण सदनस्य कार्यप्रणाली दिनैकं यावत् अग्रे स्थगिता। पठानिया महोदयेन सदनस्य कार्यप्रणाली अग्रिमदिनस्य शनिवासरस्य प्रातः एकादशवादनपर्यन्तं (11:00) स्थगिता। अपरपक्षे मुख्यमन्त्रिणः सुखविन्दर सिंह सुक्खू महोदयस्य नेतृत्वे काङ्ग्रेस-विधायकदलः विपक्षस्य व्यवहारस्य विरोधे उद्घोषान् कुर्वन् सदनात् बहिः आगच्छत्। सत्तारूढदलस्य विधायकैः विपक्षस्य उपरि राष्ट्रगानस्य अवमाननायाः आरोपः कृतः।

### वर्षाकालीन-सत्रस्य आरम्भात् पूर्वं विपक्षस्य प्रदर्शनम्, सर्वकारस्य विरोधे घोषणाघोषः

विधानसभायाः वर्षाकालीन-सत्रस्य आरम्भात् प्राक् एव भाजपादलेन विधानसभायां विपक्ष- प्रकोष्ठस्य बहिः प्रदर्शनं कृतम्। अस्मिन् काले भाजपाविधायकैः सर्वकारस्य विरोधे तीव्रा नारेबाजी कृता। भाजपानेता, विधायकश्च रणधीर शर्मा न्यवेदयत् यत् वर्तमान-काङ्ग्रेस-सर्वकारस्य जनविरोधिनीतीनां विरोधे इदं प्रदर्शनं कृतम्। भाजपा-विधायकैः हस्ते फलकानि पताकाः च गृहीत्वा विधानसभापरिसरे नारेबाजी कृता। विपक्षेण पञ्चलक्ष-रोजगारप्रदानस्य प्रतिज्ञा असत्या घोषिता। उत्तरे प्रदत्तानां तथ्यानां च प्राधान्येन उपस्थापनं भविष्यति मुख्यमन्त्री मन्त्रिणः आदिष्टवान् यत् सर्वकारस्य निरोधार्थं विपक्षेण ये विषयाः उत्थाप्यन्ते, तेषु सम्बद्धाः विभागाः पूर्णसज्जां धारयेयुः। प्रश्नकाले शून्यकाले च पृष्टानां प्रश्नानाम् उत्तरेषु तथ्यानि प्राधान्येन स्थापनीयानि। सुक्खू महोदयः विपक्षम् अवदत् यत् तथ्यानि स्वीकृत्य एव सदने आगन्तव्यम्। सः अकथयत् यत् विंशतिवर्षेषु प्रथमवारं दशदिवसीयः सत्रः आहूतः अस्ति। सः विपक्षं प्रतिपक्षनेतारं च अवदत् यत् विरोधं 'वॉकआउट' च कुर्वन्तु, किन्तु सर्वकारस्यापि वचनं शृण्वन्तु। मुख्यमन्त्री आशङ्कां प्राकटयत् यत् निर्वाचनानां कारणेन सामाजिकमाध्यमेषु दृश्यमानतां रक्षितुं विपक्षः कोलाहलं कर्तुं शक्नोति।

## वर्षाकालीनसत्रे आक्रामकनीतिम् अङ्गीकरिष्यति सत्तापक्षः

सत्रात् एकदिनं पूर्वं मुख्यमन्त्रिणः सुखविन्दर सिंह सुक्खू महोदयस्य अध्यक्षतायां काङ्ग्रेस-विधायकदलस्य उपवेशनम् अभवत्। अस्मिन् सत्रे विपक्षस्य आक्रमणानां प्रश्नानां च दृढतया उत्तरप्रदानस्य रणनीतौ चर्चा जाता। मुख्यमन्त्री मन्त्रिणः विधायकांश्च विपक्षस्य प्रश्नानां तथ्याधारितम् उत्तरं दातुं पूर्णसज्जतासहिताः आगन्तुं च आदिष्टवान्। अस्मिन् उपवेशने उपमुख्यमन्त्री मुकेश अग्निहोत्री, काङ्ग्रेस- प्रदेशाध्यक्षः विनयकुमारः, काङ्ग्रेसविधायकाः उपस्थिताः आसन्।

### राजकीय-प्रतिशोधात् आरभ्य भ्रष्टाचार-पर्यन्तं विषयान् उत्थापयिष्यति भाजपा

राज्यविधानसभायाः वर्षाकालीनसत्रं शुक्रवासरे शिमला-नगरे प्रारभ्यते। अस्यां शृङ्खलायां गुरुवासरे सायङ्काले विपक्षनेतुः जयरामठाकुरस्य अध्यक्षतायां भाजपाविधायकदलस्य मन्त्रणा अभवत्, यस्यां सत्तारूढ-काङ्ग्रेससर्वकारं विधानसभायाः अन्तः बहिः च निरोद्धुं योजना निर्मिता। भाजपा सर्वकारं प्रशासनिक-वित्तीय-मोर्चेषु अपि कठघरे स्थापयितुं प्रयतते। पक्षः नियमव्यवस्थायाः, भ्रष्टाचारस्य आरोपाणां, कर्मचारिणां पेन्शनभोगिनां च लम्बितानां विषयाणां, असेवावृत्तिः, कृषकाणां समस्यानाम्, आपदा-साहाय्य-कार्याणां काङ्ग्रेस-प्रतिज्ञानां च विषयान् प्रमुखतया उत्थापयिष्यति।

## प्रथमदिवसे एव सङ्घर्षस्य सङ्केताः

वर्षाकालीन-सत्रस्य प्रथमदिवसे एव विपक्षस्य आक्रामकवृत्तेः कारणेन सत्तापक्ष-विपक्षयोः मध्ये सङ्घर्षस्य सम्भावना वर्तते। प्रथमसूचना- अहवालस्य पृच्छायाश्च विषयेषु यदि स्थगनप्रस्तावः आगच्छति, तर्हि सदनस्य कार्यप्रणाली बाधिता भवितुं शक्नोति। प्रश्नकाले विपक्षः सर्वकारात् उत्तरं याचमानः सदने गतिरोधम् उत्पादयितुं शक्नोति।

## विधानसभाध्यक्षेण उभयोः दलयोः सहयोगाय प्रार्थना कृता, अवदत्- सत्रस्य अवधिः वर्धितुं शक्यते

विधानसभाध्यक्षः कुलदीप सिंह पठानिया उभयोः पक्षयोः सदनस्य कार्यसञ्चालने सहयोगाय प्रार्थनाम् अकरोत्। सः अवदत् यत् सत्रस्य अवधिः वर्धितुं शक्यते, सर्वेभ्यः सदने वक्तुं समयः दास्यते।




## दिक्खी ने चुप रेई गिया...

उपजाऊ खेतर होई गे बंजर दिक्खी ने चुप रेई गिया।
वारे पारे खूनी मंजर दिक्खी ने चुप रेई गिया ।।

कुते राम बणादा बड्डा कुते अल्लाह ताला ए।
रोज लड़ादे मस्जिद मंदर दिक्खी ने चुप रेई गिया।।

टुकड़े खातर लड़ियां बिल्लियां खूब तमासे कित्ते ।
बिल्लियां दे जज बणी गे बंदर दिक्खी ने चुप रेई गिया।।

भाईयां भाईयां बिच्च झमेले जोरू जोर जमीनां दे।
उट्ठदे नौंएं रोज बवंडर दिक्खी ने चुप रेई गिया।।

नैतिकता ईमानदारी ते कन्ने देस प्यारे दे।
खुन्ने होई गे सारे संदर दिक्खी ने चुप रेई गिया।।

पैसे सुट्टो करो पढ़ाई आज्ज जमाना पैसे दा ।
बणे दुकानां विद्या मंदर दिक्खी ने चुप रेई गिया।।

जिन्हां हत्थां उपकार हुंदे थे ओ बी इक्क जमाना था।
उन्हां हत्थां आज्ज पैने खंजर दिक्खी ने चुप रेई गिया।।

खूब कमाईयां कित्तियां लोकां काले धंधे करी करी।
बैट्ठे केई बणी सिकंदर दिक्खी ने चुप रेई गिया।।

बुक्कली बिच्च छुपाई छुरियां मुक्खे राम उच्चारा दे।
बाहरे चिट्टे काले अंदर दिक्खी ने चुप रेई गिया।।

पापां धरती गेई भरोई खूब सुणाया रोई ने।
किच्छ नी बोल्ले पीर पैगंबर दिक्खी ने चुप रेई गिया।।

**अशोक दर्द डलहौजी चंबा हिमाचल प्रदेश**

## १३० नियमान्तर्गतं द्वयोः महत्त्वपूर्ण-प्रस्तावयोः चर्चा भविष्यति

अत्र शिमलानगरस्य मार्गाणां पादचारिणां च सम्बद्धा संशोधनविधिः, हिमाचलप्रदेश- पञ्चायतीराज- संशोधन-अध्यादेशः अन्तर्भवति। शुक्रवासरे विधायकौ विनोद सुल्तानपुरी तथा इन्द्रदत्त लखनपाल ध्यानाकर्षण-प्रस्तावम् आनेष्यतः। १३० नियमान्तर्गतं द्वौ प्रस्तावौ चर्चिष्येते- प्रथमः राज्यस्य चिकित्सा-संस्थानां निर्माणाधीनभवनानाम्, उपकरणानाम्, औषधानां, रिक्तपदानां स्वास्थ्यसेवा-गुणवत्तायाश्च विषये (विपिनसिंह परमार, नीरज नय्यर, डॉ. जनक राज, पवनकुमार काजल च आनेष्यन्ति)। द्वितीयः प्रस्तावः विधायकस्य केवलसिंह पठानिया महोदयस्य जलसंसाधनानां, जलविद्युत्- परियोजनाभ्यः प्राप्यमाण-निःशुल्क-विद्युतः, जल- उपकरस्य सङ्ग्रहस्य राज्यहित-संरक्षणस्य च विषये भविष्यति।

### सत्रस्य प्रारम्भात् पूर्वस्य रूपरेखा

विधानसभायाः द्वादशं सत्रं शुक्रवासरे प्रातः एकादशवादने (11:00) दिवङ्गतस्य विधायकस्य विजयेंद्र सिंहस्य पूर्वविधायकस्य रामचन्द्र भाटिया महोदयस्य च निधने शोकप्रस्तावेन सह प्रारब्धव्यम् आसीत्। प्रश्नकालानन्तरं मुख्यमन्त्री साप्ताहिक- शासकीय-कार्यसूच्या सदनम् अवबोधयिष्यति। ततः परं राज्यपाल-राष्ट्रपतिभ्यां स्वीकृतानाम् अष्टविधेयकानां प्रतिलिपयः सदनस्य पटले स्थापयिष्यन्ते।

# भारतीयज्ञानपरम्परायां शास्त्रार्थपरम्परा अतीव प्राचीना वैज्ञानिकस्वरूपा च – प्रो. कान्ताभाटिया



**हिमसंस्कृतवार्ताः — सत्येन्द्रपाठकः, लखनऊ।**

लखनऊ, 21 अगस्त 2026। संस्कृतसंस्कृतिविकाससंस्थानम्, अवधप्रान्तस्य तत्त्वावधानेन संस्कृतदिवसोपलक्ष्ये 'भारतीयज्ञानपरम्परायां शास्त्रार्थपरम्परा' इति विषयमधिकृत्य विद्वद्व्याख्यानस्य आयोजनम् आभासीयमाध्यमेन सम्पन्नम्। कार्यक्रमे मुख्यातिथिरूपेण गुरुकुलप्रकल्पस्य राष्ट्रीयाध्यक्षा प्रो. कान्ताभाटियामहोदया उपस्थिताऽभवत्। स्वीयसम्बोधने तया प्रतिपादितं यत् भारतीयानां शास्त्रार्थपरम्परा अतीव प्राचीना वैज्ञानिकस्वरूपा च वर्तते। भारतीयज्ञानपरम्परायां शास्त्रार्थस्य विशिष्टं स्थानं वर्तते, यत्र तर्क-विमर्शयोः माध्यमेन ज्ञानस्य परिष्कारः क्रियते।कार्यक्रमस्य मुख्यवक्तृरूपेण श्रीलालबहादुरशास्त्री-संस्कृतविश्वविद्यालयस्य, देहलीस्थस्य, सांख्ययोग-योगविज्ञानविभागाध्यक्षः प्रो. श्रीमार्कण्डेयनाथतिवारीमहोदयः उद्बोधनं प्रदत्तवान्। तेन उक्तं यत् गार्गीसदृशी विदुषी भारतीयशास्त्रार्थपरम्परायाः सशक्तवाहिका आसीत्। भारतीयशास्त्रार्थपरम्परा सुदृढा विस्तृता च अस्ति। अस्यां परम्परायां प्रतिप्रश्नस्य, तर्कस्य तथा मुक्तचिन्तनस्य पर्याप्तः अवसरः कल्प्यते।मुख्यवक्त्रा भारतीयपरम्परायां प्रश्नोत्तरस्य ज्ञानसंवादस्य च महत्त्वं प्रतिपादितम्। तेन स्पष्टं कृतं यत् शास्त्रार्थपरम्परा केवलं वादविवादस्य माध्यमं न, अपितु तत्त्वान्वेषणस्य ज्ञानपरिष्कारस्य च महत्त्वपूर्णं साधनम् अस्ति। कार्यक्रमे आशीर्वचनप्रदातारूपेण प्रो. राधागोविन्दत्रिपाठीमहोदयः, कार्यक्रमाध्यक्षारूपेण डॉ. वीणामिश्रामहोदया, संयोजिकारूपेण डॉ. एल्. सविता आर्यामहोदया च उपस्थिताः। कार्यक्रमस्य प्रारम्भे श्री प्रिन्सशुक्लमहोदयेन वैदिकमङ्गलाचरणम्, शिखामिश्रामहोदयया लौकिकमङ्गलाचरणम्, डॉ. सुमनमिश्रामहोदयया स्वागतभाषणं च प्रस्तुतम्। कार्यक्रमस्य सञ्चालनं सुश्री दृष्टि आर्या कृतवती। डॉ. एल्. सविता आर्या साप्ताहिकप्रतिवेदनं प्रस्तुतवती। कार्यक्रमस्य अन्ते श्री सत्येन्द्रपाठकेन धन्यवादज्ञापनं कृतम् तथा श्री देवेशकुमारेण कार्यक्रमस्य प्रतिवेदनलेखनं सम्पन्नम्।

कार्यक्रमे देशस्य विभिन्नेभ्यः भागेभ्यः संस्कृतविद्वांसः, आचार्याः, छात्राः संस्कृतानुरागिणश्च आभासीयमाध्यमेन उत्साहपूर्वकं सहभागितां कृतवन्तः। कार्यक्रमेन भारतीयज्ञानपरम्परायां शास्त्रार्थस्य गौरवपूर्णं स्थानं पुनः रेखाङ्कितम्, तथा तस्याः परम्परायाः समकालीनप्रासङ्गिकतायाः विषये अपि प्रकाशः प्रक्षिप्तः।

# कटिहारनगरे सन्तरविदास-जयन्तीकार्यक्रमानां शुभारंभः



*कटिहारम्,२१ अगस्त २०२६*

*वार्ता प्रेषकः:-डा विमलेश झा*

बिहारराज्यस्य कटिहारनगरे सन्तशिरोमणेः श्रीरविदासमहात्मनःषट्शतपञ्चाशत्तमजयन्त्याः शुभारम्भः अभवत्। कार्यक्रमे समाहरणालय-परिसरात् जागरूकतारथः हरितध्वजेन प्रस्थितः। अस्मिन्नवसरे बिहारराज्यस्य पूर्वोपमुख्यमन्त्री तथा कटिहारक्षेत्रस्य विधायकः श्रीतारकेश्वरप्रसादः, जिलाधिकारी श्रीआशुतोषद्विवेदी च संयुक्तरूपेण उपस्थितौ आस्ताम्। विधायकः श्रीतारकेश्वरप्रसादः जयन्तीसमारोहस्य व्यवस्थायाः समीक्षाम् अकरोत्। सः अधिकारिणः व्यापकजनसहभागितां सुनिश्चितुं कार्यक्रमस्य प्रभावीप्रचारप्रसारं च कर्तुम् निर्देशान् अयच्छत्। जयन्तीकार्यक्रमेषु पञ्चायतस्तरे कलशयात्राः आयोजयिष्यन्ते। एतस्य कृते यात्रामार्गाणां पूर्वनिर्धारणं आवश्यकव्यवस्थाः च कर्तुम् आदेशाः प्रदत्ताः। जिलाधिकारी श्रीआशुतोषद्विवेदी अवदत् यत् २७ अगस्ततः १५ फेब्रुवरीपर्यन्तं प्रत्येकं गुरुवासरे सर्वेषु टोलेषु "सन्तरविदासशिविरम्" आयोजयिष्यते। एतेषु शिविरेषु , अन्नपंजिका(राशनकार्ड), जन्ममृत्युप्रमाणपत्रे, विविधजनसेवाः, कल्याणकारीयोजनासम्बद्धसेवाश्च उपलब्धाः भविष्यन्ति। प्राप्तानाम् आवेदनानां यथाशक्ति तस्मिन्नेव दिवसे निष्पादनं कृत्वा लाभार्थिभ्यः प्रमाणपत्राणि स्वीकृतिपत्राणि वा प्रदास्यन्ते। अपि च युवानां विद्यार्थिनां च सहभागितां सुनिश्चितुं विविधाः गतिविधयः आयोजयिष्यन्ते। तासु अन्तर्विद्यालयीयक्रीडास्पर्धाः, सायकिलयानरैली, वादविवादस्पर्धाः, निबन्धलेखनस्पर्धाश्च आयोजिता:भविष्यन्ति।

# लक्ष्मीदेवीशराफ-आदर्शसंस्कृतमहाविद्यालये दीक्षारम्भकार्यक्रमः समायोजितः



***हिमसंस्कृतवार्ता, अंशुमान पाण्डेयः, देवघरः।***

लक्ष्मीदेवीशराफ-आदर्शसंस्कृतमहाविद्यालये देवघरे, झारखण्डे केन्द्रीयसंस्कृतविश्वविद्यालयस्य नई दिल्लीतः प्राप्तमार्गदर्शनानुसारं अगस्तमासस्य पञ्चमदिनाङ्कतः नवदशदिनाङ्कपर्यन्तं दीक्षारम्भ-कार्यक्रमः सोत्साहेन परिपालितः। अस्य कार्यक्रमस्यान्तर्गततया दशदिनात्मकं संस्कृतसम्भाषणशिविरम्, महाविद्यालयस्य पूर्वच्छात्रेण चिरञ्जीविना अंशुमानपाण्डेयेन संचालितम्। तत्र महाविद्यालयस्य सर्वे छात्रछात्राः भागं अगृह्णन्। अस्य कार्यक्रमस्य अङ्गतया श्रीराकेशकुमारपाण्डेयवर्येण आङ्ग्लभाषाव्याकरणशिक्षणयोगाभ्यासादिकार्यं सम्पादितम् श्रीकिसलयकुमारझावर्येण पोर्टलविषयकशिक्षणं प्रदत्तम्, सुनीलकुमार-पासवानवर्येण संगणकविषयज्ञानं छात्रेभ्यः प्रादायि। श्रीचन्द्रेश्वरयादववर्येण ग्रन्थालयसंरक्षणं कथं स्यात्तत् प्रतिपादितम्। दशदिवसीयस्यास्य दीक्षारम्भ-कार्यक्रमस्य समापनसत्रे मुख्यातिथिरूपेण State Bank of India इति संस्थायाः (डिप्टी जनरल मैनेजर) श्रीसोमयाजुलसत्यनारायणरावमहोदयाः उपस्थाय छात्रान् समुदबोधयन् । यत् संस्कृतं मानवस्य मतेः, समाजस्य ,समाजकल्याणस्य च विशिष्टमुपकरणं वर्तते, संस्कृताध्ययनेन न केवलं शारीरिकविकासः अपितु मानसिकात्मिकविकासः अपि साध्यो भवतीति । सभायाः अध्यक्षाः महाविद्यालयस्य प्राचार्याः आचार्याः० के० साम्बशिवमूर्तिवर्याः उपादिशन् यत् संस्कृतं मानवजीवनसंस्कृतिसाधनैका भाषाऽस्ति। भारतं विश्वगुरुस्थानं प्रापयितुं भाषेयं प्रशस्तिमार्गं निर्माति। अतः सर्वे जनाः विशेषरूपेण युवानः उत्साहेन संस्कृताभ्यासमध्ययनं च कुर्युः, शास्त्रेषु विद्यमानवैज्ञानिकतत्त्वानाम् आविष्करणं कृत्वा तेषां प्रचारप्रसारः करणीय इति छात्रान् समभ्यप्रेरयन् । सम्पूर्णस्यास्य दशदिनात्मकसम्भाषणस्य संयोजकत्वं व्याकरणाध्यापकेन डॉ. राहुलपोखरियालवर्येण निरूढमस्ति। महाविद्यालयस्य सर्वे छात्राः आचार्याः कर्मचारिणश्च महतोत्साहेन भागं स्वीकृत्य कार्यक्रमस्य शोभामवर्धयन्। अस्मिन् पावनकार्यक्रमे संस्कृतं प्रति सामाजिकजनानां रुचिसम्पादनाय देवघरनगरे शोभायात्रापि विहिता।

# तमिलनाडुराज्ये डीएमकेविधायकानां शासकीययानस्वीकारे अस्वीकृतिः

हिमसंस्कृतवार्ताः:- डा. विमलेश झा, चेन्नै।

तमिलनाडुराज्यस्य विधानसभायां विधायकेभ्यः शासकीययानप्रदानयोजनायाः विषये तीव्रा चर्चा अभवत्। डीएमकेदलस्य ५९ विधायकाः नूतनशासकीययानस्य कृते स्वस्वीकृतिं न अयच्छन्। विपक्षनेता उदयनिधिः स्टालिनः अवदत् यत् राज्यसर्वकारः ऋणभारयुक्तः वर्तते, अतः विधायकेभ्यः निःशुल्कयानप्रदानात् पूर्वं तेषाम् आर्थिकस्थितेः सम्पत्तेश्च समुचितपरीक्षणं करणीयम्। तेनोक्तं यत् आर्थिकस्थितिमवलोक्य एव यानप्रदानस्य निर्णयः करणीयः। अत्रेदं उल्लेखनीयं यत् तमिलनाडुराज्यस्य मुख्यमन्त्री सर्वेषां नवनिर्वाचितानां विधायकानां कृते शासकीययानप्रदानस्य कृते घोषणां कृतवान् आसीत्।

# बिहारसर्वकारस्य सूचना-प्राविधिकी-विभागस्य ConveGenius.AI-संस्थायाः च मध्ये सहमतिपत्रे (MoU) हस्ताक्षरम्




- **अनेन सहमतिपत्रेण उद्योगस्य उच्चकौशलयुक्तावसराणां च संवर्धनं भविष्यति।**
- **कृत्रिमबुद्ध्या (AI) सह भविष्यं प्रतिअग्रसरः बिहारः- नीतीश मिश्रः**

हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्। बिहारे कृत्रिमबुद्धेः क्षेत्रे नवोन्मेषस्य, तांत्रिकदक्षतायाः विकासस्य, नूतन- उद्योगानाम् अवसराणां संवर्धनाय एकस्याः महत्त्वपूर्णायाः योजनायाः अन्तर्गतं बिहारसर्वकारस्य सूचना- प्राविधिकी- विभागेन ConveGenius.AI संस्थया सह माननीयानां मन्त्रिणां नीतीशमिश्रमहोदयानां गरिमामय्याम् उपस्थितौ सहमतिपत्रे हस्ताक्षरं कृतम्। अस्य सहमतिपत्रस्य मुख्यम् उद्देश्यं बिहारराज्यं कृत्रिमबुद्धिसक्षम- राज्यरूपेण विकसितं कर्तुं, राज्ये AI- आधारित- आधारभूतसंरचनायाः, उत्पादानां, सेवानां, प्राविधिक- समाधानानां च विकासं प्रोत्साहयितुम् अस्ति।

मन्त्री नीतीशमिश्रः अवदत् यत् माननीयस्य मुख्यमन्त्रिणः सम्राटचौधरीमहोदयस्य दृष्टिकोणः बिहारं तान्त्रिकदृष्ट्या सशक्तं, नवोन्मेषाधारितं, भविष्यस्य आवश्यकतानुसारं सक्षमं च राज्यं विधातुम् अस्ति। AI, उदीयमान- प्रौद्योगिकी- क्षेत्रेषु निवेशः, उच्चकौशलयुक्तानां तान्त्रिकक्षमतानां विकासः, युवेभ्यः नूतन- उद्योगसृजनं च इमं दृष्टिकोणं साकारं कर्तुं महत्त्वपूर्णाः चरणाः सन्ति।

सः न्यवेदयत् यत् ConveGenius.AI भारते AI-आधारितप्रौद्योगिक्यां प्रमुखा संस्था वर्तते, या बृहत्स्तरे AI- आधारभूतसंरचनानिर्माणाय, AI- समाधानप्रयोगे निरता अस्ति। अस्यां संस्थायां तन्त्रज्ञानं, शैक्षणिक-अभिकल्पनम्, प्रभावमूल्याङ्कनं, परिवर्तन-प्रबन्धन-क्षेत्रेषु ५०० तः अधिकाः व्यावसायिकाः कार्यरताः सन्ति। संस्थायाः अनेकेषां राज्यानां केन्द्रशासित-प्रदेशानां च सह सहयोगः वर्तते। एतदतिरिच्य, संस्था सर्वकारस्य उद्योगिनां च कृते विविधानि AI-अनुप्रयोगाणि विकासयति, येषां प्रयोगः व्हाट्सएप, आई. वी. आर., वेब, एंड्रॉयड इत्यादीनां माध्यमेन नागरिकसेवायां, शिक्षायां, कल्याणे, कौशलविकासे च क्रियते।

सः अग्रे अवदत् यत् अस्मात् सहयोगात् राज्ये AI-नवोन्मेषस्य, कौशलविकासस्य, प्रौद्योगिकी-विस्तारस्य, रोजगारसृजनस्य च गतिः वर्धिष्यते। अस्मिन् निवेशे १०० तः अधिकाः प्रत्यक्ष- वृत्ति-अवसराः उत्पत्स्यन्ते, येन स्थानिके स्तरे उच्चकौशलनिर्माणाय युवेभ्यः नूतनावसराः लप्स्यन्ते।

मन्त्री स्पष्टीकृतवान् यत् अस्य सहमतिपत्रस्य अन्तर्गतं ConveGenius.AI संस्था बिहारसर्वकाराय B-ONT (Bihar Ontology) विकासाय साहाय्यं प्रदास्यति, यत् राज्यस्य विविधानां योजनानां सेवानां च एकात्मकं ज्ञानचित्रं भविष्यति। एतत् ज्ञानचित्रं राज्यस्य तान्त्रिक-ज्ञानाधारित- संरचनाम् एकीकृत्य नागरिकेभ्यः योजनासु सुगमप्रवेशं दास्यति। अनेन सह राज्यस्य शैक्षणिक-व्यावसायिक-संस्थासु सान्दर्भिक-AI कौशलप्रशिक्षणम् अपि दास्यते, येन युवानः उत्तमान् उद्योग-अवसरान् प्राप्स्यन्ति। एषः कार्यक्रमः विद्यमान-उद्योगेषु अपि प्रवर्तिष्यते येन कर्मकराः तन्त्रज्ञाश्च AI-दक्षतां प्राप्नुयुः। तेन सूचितं यत् ConveGenius.AI संस्थया बिहारे आधारभूतसंरचनायाः, तान्त्रिकसञ्चालनस्य, कार्यक्रमवितरणस्य च कृते ₹१०० कोटितः अधिकस्य मुख्यनिवेशस्य (Anchor Investment) प्रस्तावः स्थापितः। संस्था बिहारे तादृशानां AI-उत्पादानां निर्माणे सहयोगं करिष्यति, येषां प्रयोगः बिहारराज्ये तथा समग्रे देशे कर्तुं शक्येत। असौ अवदत् यत् अस्मिन् कार्यक्रमे विकसिताः सर्वे AI प्रणाल्यः, दत्तसामग्रीमञ्जाः, सञ्चालनप्रक्रियाश्च राष्ट्रिय- राज्यस्तरीय-नीतिनियमैः सह सङ्गताः भविष्यन्ति। एतत् बिहारे एकस्य सुरक्षितस्य, उत्तरदायिनः, नागरिककेन्द्रितस्य च AI-पारिस्थितिकीतन्त्रस्य विकासाय दृढं पदं भविष्यति।

अस्मिन् सहमतिपत्रे (MoU) विभागस्य पक्षतः उपसचिवः श्रीशहनवाज़-अहमद-नियाज़ी तथा च ConveGenius.AI पक्षतः मुख्य- कार्यपालक-पदाधिकारी, जयराजभट्टाचार्यः हस्ताक्षरम् अकुरुताम्।

# बिहार-सततविकासलक्ष्य-सम्मेलनम्-२०२६ : मधुबनी-जनपदस्य दण्डाधिकारिणा उपस्थापितं जनपद-आधारित-विकासप्रतिरूपम्




**जनपदस्तरीय-समेकितयोजना, विभागीयाभिसरणं, तथ्य-आधारित-पर्यवेक्षणं च 'विकसित-बिहार @२०४७' इत्यस्य आधारशिला इति प्रतिपादितम्**

मधुबनी, २१ अगस्तः।हिमसंस्कृतवार्ता राघव नाथ झा

बिहार-सततविकासलक्ष्य-सम्मेलनस्य द्वितीये दिवसे पाटलिपुत्र-नगरस्थे अधिवेशनभवने आयोजिते जनपद-आधारित-विकासः तथा सततविकासलक्ष्य-स्थानीयकरणम् इति सत्रे मधुबनी-जनपदस्य दण्डाधिकारिणा आनन्दशर्मणा जनपदस्य विकासस्यानुभवाः समेकितनियोजनदृष्टिकोणश्च न्यवेद्यन्त।

"विकसित-बिहार @२०४७ प्रति तीव्रगतिप्रगतिः" इति मुख्यविषये आयोजिते द्विदिवसीये सम्मेलने दण्डाधिकारिणा "तीव्रविकासाय समेकित-जनपदनियोजनम् : सततविकासलक्ष्याणां तथा विकसित-बिहार @२०४७ प्राप्तये पाठाः" इति विषयमधिकृत्य व्याख्यानं कृतम्। अस्मिन् सत्रे सः जनपदस्तरीय-समेकितयोजनां, विभागीयाभिसरणं, परिणाम-आधारित-पर्यवेक्षणं, तथ्य-आधारित-निर्णयनिर्माणं तथा स्थानीयस्तरे सततविकासलक्ष्याणां प्रभावशालि-क्रियान्वयनं तीव्रविकासस्य महत्त्वपूर्णाधारशिलारूपेण उदघोषयत्। दण्डाधिकारी आनन्दशर्मा अवदत् यत् 'विकसित-बिहार @२०४७' इति लक्ष्यं सम्प्राप्तुं विकासनीतिं जनपदानां वास्तविकावश्यकताभिः, स्थानीयसंसाधनैः, जनसहभागेन च संयोजयितुम् आवश्यकं वर्तते। विविधानां विभागानां योजनासु दृढसमन्वयेन तथा विकासकार्याणां परिणामानां निरन्तरपर्यवेक्षणेन योजनानां प्रभावशीलता संवर्धयितुं शक्यते।

व्याख्यानकाले सततविकासलक्ष्याणि स्थानीयविकासप्राथमिकताभिः सह योजयितुं, पञ्चायतानां भूमिकां सुदृढां विधातुं तथा जनपदप्रशासनं विकासस्य प्रभावशालिसमन्वयकेन्द्ररूपेण स्थापयितुं विशेषः बलः दत्तः।

अस्य सत्रस्य अध्यक्षता नीत्यायोगस्य (भारतसर्वकारस्य) सदस्येन प्राध्यापक-के.वी.राजू-वर्येण तथा वरिष्ठपरामर्शदात्र्या डॉ.नीलमपटेल-महोदयया कृता। कार्यक्रमे बिहारसर्वकारस्य मन्त्रिणः, अपरमुख्यसचिवाः, वरिष्ठाः प्रशासनाधिकारिणः, नीत्यायोगस्य अधिकारिणः तथा विकासक्षेत्रस्य तज्ज्ञाः उपस्थिताः आसन्।

वरिष्ठनीतिनिर्मातॄणां तज्ज्ञानां च समक्षं मधुबनी-जनपदस्य विकाससम्बद्धानुभवानां समेकितनियोजनप्रणाल्याश्च उपस्थापनं जनपदस्य कृते महती उपलब्धिः मन्यते। मधुबनी-जनपदस्य एतद् उपस्थापनं "जनपद-नेतृत्व-विकासः" इति सङ्कल्पनां सुदृढां कर्तुं स्थानीयस्तरे च सततविकासलक्ष्याणि ठोसपरिणामेषु परिवर्तयितुं महत्त्वपूर्णं पदक्षेपं वर्तते।

# ललितनारायण- मिथिला- विश्वविद्यालयस्य- दरभङ्गायाः राष्ट्रियसेवाप्रकोष्ठेन समस्तीपुर- मण्डलस्य द्विशतं (२००) स्वयंसेवकानां 'युवा- आपद्- मित्र- आवासीयप्रशिक्षणम्' षष्ठे दिनेऽपि प्रवृत्तम्




**स्वयंसेवकानां विविधदलान् निर्माय मनोकामना- मन्दिरोद्याने भूकम्प- जलोप्लव- अग्निकाण्ड- मार्गदुर्घटनादीनां पूर्वाभ्यासः (मॉक ड्रिल) कारितः**

**हिमसंस्कृतवार्ताः- दरभङ्गाः।** ललितनारायण- मिथिला- विश्वविद्यालयस्य राष्ट्रियसेवाप्रकोष्ठेन बिहारराज्य- आपत्प्रबन्धन- प्राधिकरणस्य सौजन्येन विश्वविद्यालयपरिसरे आयोज्यमानं समस्तीपुरमण्डलस्य द्विशतं स्वयंसेवकानां सप्तदिवसीयम् आवासीय- युवा- आपद्- मित्र- प्रशिक्षणशिबिरं षष्ठे दिनेऽपि प्राचलत्। शिबिरस्य शुभारम्भः राष्ट्रगीतेन राष्ट्रियसेवाप्रकोष्ठस्य लक्ष्यगीतेन चाभवत्। अस्मिन्नवसरे राज्य- आपत्- प्रतिक्रियाबलस्य मुख्य- आरक्षकाः (हवालदार) कृष्णनन्दनसिंहः, रूपेशकुमारपासवानः, देवकुमारः, मालिककुमारः, खोखोकुमारः, राजुकुमारः, तनुजाकुमारी, सन्तोषीकुमारी, शिबिरसंयोजकाः डॉ. आर. एन. चौरसिया, डॉ. शबनमकुमारी, डॉ. सोनूरमशङ्करः, डॉ. रीताकुमारी, डॉ. कामेश्वरपासवानः, डॉ. प्रेमाकुमारी, डॉ. अनुपमप्रिया, मनीषराजः, अक्षयकुमारझाः, रवीन्द्रकुमारसिंहः, विकासकुमारः, अमितकुमारझाः, मणिकान्तठाकुरः, मुकेशकुमारझाः, प्रशान्तः, विकासः, सञ्जयकुमारमहतो इत्यादयः सक्रियरूपेण सहभागिनः आसन्। अपि च, रुग्णवाहिका- औषध- चिकित्सोपकरणैः सह सदर- चिकित्सालयस्य (दरभङ्गा) पञ्चसदस्यीयं दलं समुपस्थितमासीत्।

## प्रशिक्षणसत्राणां विवरणम्-

### *प्रथमं सत्रम् (जनसम्मर्द-नियन्त्रणम्)*

प्रशिक्षकः देवकुमारः जनसम्मर्द-नियन्त्रणस्य विषये बोधयन् अवदत् यत् अनियन्त्रितः जनसम्मर्दः कदाचित् आपद्रूपं धारयति। अत्यधिक- जनसङ्ख्या, सामाजिकमाध्यमानां दुरुपयोगः, जनप्रवादः (अफवाह), शोभायात्रा, तीर्थयात्रा, उत्सवाः, क्रीडा तथा धार्मिक- सांस्कृतिक- आयोजनादीनां कारणैः आपदः सम्भवन्ति। अतः जनसम्मर्द-प्रबन्धनम् अनिवार्यमस्ति। एतादृश्याम् अवस्थायां बालेषु, वृद्धेषु, रुग्णेषु, महिलासु च विशेषध्यानम् आवश्यकम्।

### द्वितीयं सत्रम् (सुरक्षित-नौकायनम्)

प्रशिक्षकः राजुकुमारः सुरक्षितनौकायानविषये विस्तरेण चर्चयन् अवदत् यत् नौकादुर्घटनाभिः बिहारे शताधिकानां जनानां मृत्युः भवति। परीक्षितायाः नौकायाः, प्रशिक्षितनाविकानां तथा क्षमतानुसारं यात्रिकाणां स्थापनेनैव दुर्घटनाः रोद्धुं शक्यन्ते। सः सङ्कटकाले करणीयाकरणीयविषयाणां सम्पूर्णामवगतिम् अदात्।

### तृतीयं सत्रम् (जलरक्षा एवं जलप्रबन्धनम्)

प्रशिक्षकः खोखोकुमारः 'जले निमज्जनात् रक्षा' तथा 'सुरक्षिततरणम्' इत्यनयोः विषये विस्तरेण विवरणं प्रस्तुत्य जलस्वच्छतायाः जलप्रबन्धनस्य च महत्त्वम् अबोधयत्। मुख्य-आरक्षकः कृष्णनन्दनसिंहः अवदत् यत् आपत्काले NDRF अथवा SDRF दलस्य आगमने समयः भवति, परन्तु प्रशिक्षिताः स्वयंसेवकाः आरम्भिके सुवर्णावसरे (गोल्डन आवर) प्राणरक्षाम् कर्तुं शक्नुवन्ति।

## अपराह्णसत्रं पूर्वाभ्यासः च-

अपराह्णसत्रे स्वयंसेवकानां सूचनादलं, राज्यसुरक्षादलं, समाधानदलं, शोध- उद्धारदलं, प्राथमिकचिकित्सादलं, परिवहनदलं, माध्यमप्रबन्धनदलं, शिरोव्रणदलं, संज्ञाहानिदलं (अचेतनदलं) च निर्माय मनोकामनामन्दिरस्य सम्मुखस्थे उद्याने भूकम्प- जलोप्लव- अग्निकाण्ड- मार्गदुर्घटनादीनां पूर्वाभ्यासः (मॉक ड्रिल) कृतः। अन्तिमसत्रे मूल्याङ्कनपरीक्षा आयोजिता, यस्याः परिणामानुसारं विंशतिः (२०) उत्तमाः "युवा- आपद्- मित्राणि" चेष्यन्ते। प्रातःकाले प्रशिक्षकेन वैभवझामहोदयेन शारीरिकशिक्षणं योगाभ्यासश्च कारितः। कार्यक्रमस्य स्वागतभाषणं शिबिरसंयोजकः डॉ. आर. एन. चौरसिया अकरोत्, धन्यवादज्ञापनं च डॉ. शबनमकुमारी कृतवती।




- **नव-प्रान्त-भवनस्य (Terminal Building) निर्माणकार्याणां करिष्यन्ति समीक्षां, अन्ताराष्ट्रिय-विमानपत्तनस्य सज्जायाः उपरि अपि भविष्यति मन्त्रणा : सांसदः डॉ. गोपाल जी ठाकुरः**

# सितम्बर-मासे दरभंगा-नगरम् आगमिष्यन्ति नागर-विमानन-मन्त्री, 'उडान-कैफे' इत्यस्य करिष्यन्ति उद्घाटनम्

**दरभंगा, २१ अगस्तः। राघवनाथ झा**
दरभंगा-विमानपत्तनं देशस्य अग्रगण्य-विमानपत्तनेषु संयोजयितुं सज्जाः तीव्रीकृताः सन्ति। विमानपत्तने रात्रिकालीन-अवतरण-सुविधा-सम्बद्धाः (Night Landing) सर्वाः आवश्यकाः औपचारिकताः सज्जाश्च सम्पूर्णाः जाताः। विमान-सञ्चालन-संस्थाभ्यः समयसारणीं लब्ध्वैव रात्रिकालीन-अवतरण-सेवा आरप्स्यते इति सम्भावना वर्तते।
केन्द्रीय-नागर-विमानन-मन्त्री के. राममोहननायडु-महोदयः सितम्बर-मासे दरभंगा-नगरम् आगमिष्यति। अस्मिन् अवसरे सः निर्माणाधीनस्य नूतन-प्रान्त-भवनस्य कार्याणां प्रगतेः समीक्षां विधास्यति तथा च विमानपत्तने 'उडान-कैफे' इत्यस्य उद्घाटनं करिष्यति। नवम्बर्-मासे प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रस्तावितस्य नूतन-प्रान्त-भवनस्य उद्घाटन-कार्यक्रमस्य सज्जानामपि मन्त्री समीक्षां करिष्यति।
इयं सूचना स्थानीय-सांसदेन दरभंगा-विमानपत्तन-परामर्शदातृ-समित्याः अध्यक्षेण च डॉ. गोपाल जी ठाकुरेण शुक्रवासरे कर्णाटकस्य मैसूरु-नगरे केन्द्रीय-नागर-विमानन-मन्त्रालयस्य परामर्शदातृ-समित्याः उपवेशने भागं गृहीत्वा दत्ता।
सांसदेन निवेदितं यत् उपवेशने सः दरभंगा-विमानपत्तनम् अन्ताराष्ट्रिय-विमानपत्तनरूपेण विकसितुम् इदानीमेव आवश्यक-सज्जानाम् आरम्भाय दृढतया अभ्यर्थनां कृतवान्। सः अन्ताराष्ट्रिय-विमानपत्तनार्थम् आवश्यकाधारभूतसंरचनां, प्रान्त-विस्तारं, धावनमार्गम् (Runway), अभिगम-सुविधां (Approach facilities) तथा च सीमाशुल्क-आप्रवासन-व्यवस्थाः (Customs and Immigration) चरणबद्धरूपेण क्रमशः...८ पृष्ठे..

शीघ्रं पूरयितुम् आग्रहम् अकरोत्। मैथिली-भाषायां फलक-संकेताः नूतन-विमान-सेवाश्च डॉ. ठाकुरस्यानुसारेण उपवेशने मैथिली-भाषायां सूचनाफलकानि संकेतकाश्च, यात्रि-सुविधानां विस्तारः, नूतनाः विमान-सेवाः नूतन-मार्गाश्च, रात्रिकालीन-सञ्चालनं, श्रेष्ठाः अवतरण-सुविधाः, वातानुकूलित-भारवहनं तार्किक-केन्द्रं (Cargo and Logistics Hub) तथा च मिथिलायाः पर्यटन-व्यापार-उद्योग-रोजगारान् संवर्धयितुं विषयाणां विस्तरेण विमर्शः जातः।

सः असूचयत् यत् केन्द्रीय-मन्त्री नायडु-महोदयः विश्वस्तं कृतवान् यत् सः सितम्बर-मासे स्वसहयोगिभिः अधिकारिभिः च सह दरभंगा-नगरम् आगमिष्यति, विमानपत्तन-सम्बद्धानां विकासकार्याणां विस्तृतां समीक्षां च विधास्यति।

**'उडान-कैफे' इत्यस्य उद्घाटनार्थम् अपि निर्देशः**

सांसदेन प्रोक्तं यत् उपवेशनकाले मन्त्री नायडुः सम्बन्धित-अधिकारिभ्यः निर्देशं दत्तवान् यत् दरभंगा-आगमनस्य दिने एव विमानपत्तने 'उडान-कैफे' इत्यस्य उद्घाटनं सुनिश्चितं क्रियेत।

तेन कथितं यत् उपवेशने केन्द्रीय-मन्त्रिणा दरभंगा-विमानपत्तनस्य उपलब्धयः प्रशंसिताः, 'उडान'-योजनायाः अन्तर्गतं विकसनशील-विमानपत्तनानाम् उत्कृष्टोदाहरणरूपेण इदं प्रस्तुतं च। एतत् दरभंगा-मिथिला-क्षेत्राभ्यां गौरवविषयम् इति वदन् सांसदः अवदत् यत् अनेन क्षेत्रस्य विमान-सम्पर्कतायै नूतना गतिः प्राप्स्यते।

**विद्यापतेः नाम्ना नामकरणम् इत्यादीन् विषयान् समुत्थापितवान्**

परामर्शदातृ-समित्याः उपवेशने सांसदेन विमानपत्तनस्य प्रवेशद्वारे विमानपत्तनस्य नाम मिथिलाक्षरे अङ्कयितुं, कविकोकिलस्य महाकवि-विद्यापतेः नाम्ना विमानपत्तनस्य नामकरणं शीघ्रं घोषयितुं, केन्द्रीय-औद्योगिक-सुरक्षा-बलाय (CISF) ७ एकड-परिमित-भूमेः अधिग्रहण-प्रक्रियां सम्पादयितुं तथा च विमानपत्तनार्थम् अधिगृहीतस्य ९० एकड-भूमेः कृषकेभ्यः भूस्वामिभ्यश्च शीघ्रं प्रतिकर-प्रदानार्थं (मुआवजा) विषयेऽपि स्वरः उत्थापितः। एतदतिरिच्य राष्ट्रियराजमार्गात् (NH-27) विमानपत्तन-भवनं यावत् प्रायः ४०० कोटि-रूप्यकाणां व्ययेन प्रस्तावितस्य 'ट्रम्पेटेड्-उपरिगामिमार्गस्य' (Trumpet Flyover) सम्बन्धिताः औपचारिकताः शीघ्रातिशीघ्रं समापयितुं सांसदेन अभ्यर्थितम्। डॉ. ठाकुरः न्यवेदयत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे केन्द्रीय-नागर-विमानन-मन्त्रिणः के. राममोहननायडु-महोदयस्य मार्गदर्शने च दरभंगा-विमानपत्तनं मिथिलायाः आर्थिक-प्रगतेः, पर्यटनस्य, उद्योगस्य, व्यापारस्य, रोजगारस्य तथा च वैश्विक-सम्पर्कस्य मुख्यद्वारं विधातुं दृढप्रयासाः क्रियन्ते। सः आशां प्राकटयत् यत् आगामि-काले मिथिलायाः विमान-सेवा वैश्विक-ख्यातिं प्राप्स्यति।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरे समारब्धः संस्कृत सप्ताह महोत्सवः २०२६





**हिमसंस्कृतवार्ता अगरतला।**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरेण, लेम्बुचेरा-त्रिपुरायां, आयोजितः सप्तदिवसीयः संस्कृत-महोत्सवः २०२६ अगस्तमासस्य २१ दिनाङ्के परिसरस्य बहुप्रयोजनसभागारे भव्यतया उद्घाटितः। अयं महोत्सवः अगस्तमासस्य २१ दिनाङ्कतः २८ दिनाङ्कपर्यन्तं प्रचलिष्यति। संस्कृतभाषायाः, साहित्यस्य, भारतीयज्ञानपरम्परायाः च समृद्धिं, प्रासङ्गिकतां, चिरन्तनसांस्कृतिकमहत्त्वं च प्रकाशयितुम् अस्य महोत्सवस्य आयोजनं क्रियते।

## प्रो. गुरुचरणसिंहनेगी आसीत् कार्यक्रमस्य मार्गदर्शकः

उद्घाटनसमारोहः प्रातः सार्धदशवादने मङ्गलदीपप्रज्वलनेन प्रारब्धः। ततः राष्ट्रगीतं, विश्वविद्यालयस्य कुलगीतं, वैदिकमङ्गलाचरणं च सम्पन्नम्। वैदिकमङ्गलाचरणं वेदविभागस्य संयोजकेन डॉ. आशीषमिश्रेण प्रस्तुतम्। तदनन्तरं परिसरस्य छात्रैः उपस्थितानां सर्वेषां विशिष्टातिथीनां सम्मानार्थं संस्कृतस्वागतगीतम् प्रस्तुतम्।

एकलव्यपरिसरस्य सहनिदेशकः प्रो. सुशान्तकुमारराजः स्वागताभिभाषणं तथा कार्यक्रमस्य परिचयात्मकं वक्तव्यं च प्रस्तुतवान्। कार्यक्रमे सर्वेषां विशिष्टातिथीनां सम्माननमपि सम्पन्नम्। लेफुङ्गा-खण्डसमित्याः अध्यक्षः श्री दीपकदेववर्मा विशिष्टातिथिरूपेण स्वकीयम् अभिभाषणं प्रस्तुतवान्। मुख्यातिथिः श्री शान्तनुबिकाशदासः, टी.सी.एस्. ग्रेड्-I, मोहानपुरस्य उपमण्डलाधिकारी, सभां सम्बोधयन् भारतस्य भाषिक-साहित्यिक-सांस्कृतिकवैभवस्य संरक्षणस्य संवर्धनस्य च महत्त्वं प्रतिपादितवान्। विश्वविद्यालयेन संस्कृतशास्त्राणां प्रचार-प्रसाराय क्रियमाणस्य प्रयासस्य प्रशंसां कृत्वा सः सर्वान् विद्यार्थिनः कक्षासु समयपालनपूर्वकं उपस्थितान् भवितुं, अध्ययनशीलाः भवितुं, अधिगतज्ञानस्य समाजहिताय समुचितरूपेण प्रयोगं कर्तुं च प्रेरितवान्।

उद्घाटनसमारोहस्य अध्यक्षतां प्रो. बुलुसु पद्ममित्रश्रीनिवासः, कार्यवाहकनिदेशकः, एकलव्यपरिसरः, अकरोत्। सः अध्यक्षीयभाषणं प्रस्तुतवान्। अयं कार्यक्रमः छात्राणां, अध्यापकानां, विदुषां, व्यापकसमुदायस्य च कृते संस्कृतभाषया, संस्कृतसाहित्येन, वैदिकपरम्पराभिः, भारतीयज्ञानपरम्पराभिश्च सह संवादस्य महत्त्वपूर्णं मञ्चं प्रदत्तवान्। संस्कृत-महोत्सवस्य मुख्योद्देश्यं संस्कृतस्य ऐतिहासिकसमृद्धेः समकालीनप्रासङ्गिकतायाश्च उत्सवरूपेण प्रदर्शनम् अस्ति। संस्कृत-सप्ताहस्य कार्यक्रमान्तर्गतं २१ अगस्त् दिनाङ्के निबन्धलेखनप्रतियोगिता तथा श्रीमद्भगवद्गीताम् आधृत्य प्रतियोगिता अपि आयोजिते। सप्ताहव्यापिनि अस्मिन् कार्यक्रमे विभिन्नस्तरीयाः प्रतियोगिताः तथा संस्कृतभाषायाः प्रचार-प्रसाराय विविधाः गतिविधयश्च आयोजयिष्यन्ते। विविधैः कार्यक्रमैः छात्रेषु संस्कृतभाषायाः प्रति रुचिं, अनुरागं, अध्ययनशीलतां च वर्धयितुं प्रयासः क्रियते।

अस्य कार्यक्रमस्य सफलसञ्चालनाय डॉ. उत्तमसिंहः, डॉ. चन्दनहोता इत्येताभ्यां सह परिसरस्य अन्येषां सर्वेषाम् अध्यापकानां सक्रियसहयोगः अपि प्राप्यते।कार्यक्रमस्य समापनं व्याकरणविभागस्य अध्यक्षेन डॉ. उमेशचन्द्रमिश्रेण प्रस्तुतया धन्यवादज्ञापनया अभवत्। ततः राष्ट्रगानं सम्पन्नम्। कार्यक्रमस्य सञ्चालनं डॉ. सौम्यज्योतिसाहेन कृतम्। संस्कृत-महोत्सवः २०२६ विविधैः शैक्षणिकैः, साहित्यिकैः, सांस्कृतिकैः च कार्यक्रमैः छात्राणां, अध्यापकानां, विदुषां तथा समाजस्य विभिन्नवर्गाणां सक्रियसहभागितायाः अवसरं प्रदास्यति। महोत्सवस्य माध्यमेन संस्कृतभाषायाः अध्ययनं, अध्यापनं, साहित्यिकं सृजनं तथा भारतीयज्ञानपरम्परायाः संरक्षणं संवर्धनं च प्रोत्साहयितुं प्रयासः क्रियते।

# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीररजः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतम् व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य मध्यप्रदेशे एका विचित्रा घटना दृष्टा। एकेन नरेण श्वान-वेषः धृतः। प्रशासन-सभायाम् तेन श्वान- वन्ध्यीकरण- धन-अपहारस्य विरोधः कृतः।

**नन्दिनी-** अहो! श्वानवेष-धारणम् तु अतीव हास्यजनकम्! तन्त्राम्श-लोके अपि एका विचित्रा वार्ता श्रुता। कृत्रिम-बुद्धि-दूतैः कार्यम् त्यक्त्वा चलच्चित्राणि दृष्टानि। यदा स्वामिना ते निवारिताः, तदा एकेन दूतेन अन्यम् दूतम् हन्तुम् उद्योगः कृतः!

**काव्या-** यन्त्राणाम् कलहः तु भयङ्करः! यन्त्राणाम् विषये चीनदेशे अपि एकः यन्त्रमानवः निर्मितः। सः अतिमानवः तीव्रतमम् मानव-धावकम् अपि पराजितवान् अस्ति। तेन यन्त्रेण अतीव तीव्रतया धावितम्।

**नन्दिनी-** यन्त्रमानवस्य वेगः तु आश्चर्यकरः! अन्ते एका अन्या हास्यवार्ता मया प्राप्ता। एकेन ग्राहकेन साहाय्य-दूतः परीक्षितः। "यदि त्वम् मानवः असि, तर्हि ऋण-पत्रस्य विषये कविताम् मा लिख" इति तेन ग्राहकेन उक्तम्। तदा तेन कृत्रिम-बुद्धि-दूतेन शीघ्रम् एका लघुकविता रचिता! एवम् तस्य यन्त्र-सत्यम् उद्घाटितम्।

**काव्या-** सत्यमेव, यन्त्राणि तु मूर्खाणि सन्ति। अद्यतनी वार्ता समाप्ता। धन्यवादः।

# !!देहलीपुराधिदेवतां च कालिकां भजे!!



कालिकेति वर्णकत्रयं समावलम्बनं,
वेद्मि कष्टपाटनं नृणां यशो प्रदायकम्।
सर्वयोग्यकाम्यवृत्तिपूरकं सुनिर्मलम्,
कालिके!सुसिद्धिदे!निशम्यतां निशम्यताम्।।२६

देहलीपुराधिदेवते! सुखैकरूपिके!,
वृत्तिसौख्यमस्तु मे नृपासनं न काम्यते।
मद्धितं विधीयतां सुकामना प्रपूर्यताम्,
कालिके! समर्हजीविका सुताय दीयताम्।।२७

कालिकेऽतिकष्टजल्पनं करोमि त्वत्पुरः,
धावनेन किं भवेज् जपामि नाम सर्वथा।
वृत्तये नियुक्तये करोमि कीर्तनं मुदा,
कालिकापदार्चनेऽस्ति मद्गतिस्सदा सदा।।२८

अर्धचन्द्रचूडिकेऽसि देहलीपुराधिपे!,
योग्यवृत्तिहीनताविमुक्तये निवेदये।
बालरक्षणाय वृत्तयेऽधुना नियोजयेः,
वृत्तियोजनं कुरुष्व चण्डिके! करालिके!।।२९

नैकधा सुसेव्यसे सुघण्टया प्रबोध्यसे,
गन्धपुष्पमालिकार्चनैः मया विमण्ड्यसे।
विश्वपूजितासि वन्दितासि देवि! कालिके!
देहि योग्यजीविकां च देहलीपुराधिपे!।।३०

वृत्तिदैन्यमस्य बालकस्य किं न वीक्षसे?,
योग्यवृत्तिभाजनीभवामि केन कालिके!?।
दु:खसागरे वसामि देहलीपुराधिपे!
त्राहि त्राहि दासकं वृत्तिमेव यच्छ मे।।३१

पुत्रकस्य योग्यवृत्तिवञ्चनं न युज्यते?
लम्बितं किमस्ति कारणं कदा नियोक्ष्यते?।
वृत्तिवर्त्मबन्धनन्त्वपेहि भद्रकालिके!
मूर्धनि करं निधेहि देहलीपुराधिपे! ।।३२

क्वापि नाहमम्ब! यामि ते पदं सदा भजे,
सेवितुं पदद्वयं प्रदेहि भद्रकालिके! ।
मद्रुतं निशम्य मां प्रपाहि देवि! चण्डिके!,
कालिकां नमस्करोमि जीविकां प्रयच्छ मे।।३३

भक्तकष्टमार्जिकासि दुर्विपाकनाशिका,
विघ्नपर्वतान् नृणां निहंसि देवि! सर्वदा।
यच्छ यच्छ वृत्तिमेव किं दया न जायते?
चिन्तया निपीडितोऽस्मि रक्ष रक्ष कालिके!।।३४

भक्तमानसेऽस्ति देवि! भूरि पापकालिमा,
ध्यानमर्चनां करोमि येन तद्गतो भवेत्।
सर्वभूतसंस्थितासि सिद्धिदासि चण्डिके !
योग्यवृत्तिकर्म यच्छ बालकाय कालिके !।।३५

कालिके! सकल्मषोऽस्मि वेत्स्यभद्रकोस्म्यहम्,
संश्रयं प्रदेहि वृत्तियाचकाय सत्त्वरम्।
जीवनार्थमस्ति वृत्तिमेव मे सुसाधनम्,
रक्ष वृत्तिनिर्भरं प्रतुष्टिदे! स्ववत्सकम्।।३६

लोलुपोऽति नास्म्यहं स्ववृत्तिमेव कामये,
जीविकां विना त्वमातमोऽस्ति मेऽत्र जीवने।
तावदेव वैभवं प्रदेहि जीवनं चलेत्,
यच्छ योग्यजीविकां समर्चयामि कालिके!।।३७

मत्प्रवृत्तिरद्य जायते स्तुतौ तवाम्बिके!,
योजयामि येन वर्णकान् त्वदीयवर्णने।
कल्पयामि काव्यमेव पूजनाय कालिके!,
स्वीकुरुष्व काव्यवन्दनं मदीयवृत्तये ।।३८

यानमाशुगामि नास्ति तीव्रगं तथा शिवे!
जीविका हि जीवनस्य सत्त्वरा गतिः शुभे!।
वृत्तिवैभवं चिरादिदं मया प्रतीक्ष्यते,
येन तीव्रगा गतिः भवेन्मदीयजीवने।।३९

यत्र वृत्तिरूपिका वसेच्च भद्रकालिका,
सर्वमङ्गलं चकास्ति तद्गृहे सदा सदा।
जीवनेऽपि ते भवेत्प्रपूर्णता मनोज्ञता,
मन्दता विनश्यते विवर्धते च वेगता।।४०

कालिके! यथोचितं विधेहि मां विलोकयेः,
सेवया भवेयमेव भाग्यवांश्च जीवने।
यादृशोऽस्मि त्वत्पुरः स्वमानसं निवेदये,
ह्युच्चवृत्तिलब्धये कृपां कुरुष्व कालिके!।।४१

दासकस्य वृत्तिता विधीयतां सुकालिके!,
येन गौरवं लभै सुनिश्चितं सुदेवते!।
पादयोः नतिं करोमि पश्य भद्रकालिके!,
बालके मयि प्रसीद देहलीपुराधिपे!।।४२

याजनस्य विप्रवृत्तिरद्य देवि! लुप्यते,
पाठनस्य वृत्तिरेतदर्थमेव याच्यते।
शासनस्य जीविकासु रक्षणं विधीयते,
त्वां विना क्व यामि देवि! त्वत्पदं समाश्रये।। ४३

खेदयामि वृत्तिरुद्धतां च दीनतां शिवे!
पातितोऽस्मि सङ्कटेऽत्र नोचितं कृतं शिवे!।
वृत्तिहीनताविमोचनं कदा करिष्यते?
ह्युच्चशिक्षणालये सुतः कदा नियोक्ष्यते?।।४४

खिन्नमस्ति मन्मनस्तु जीविका न लभ्यते,
वृत्तिरिक्तताकृते च युक्तिरस्ति का नु ते?।
मुक्तबुद्धिपूर्वकं स्वबालकाय चिन्तयेः,
दासके दयाभृता दृगेकिका निपातयेः।।४५

क्रमशः ........

इति श्रीयुवराजभट्टराईकृतं देहलीपुराधिपायाः कालिकायाः वृत्तिप्राप्तिस्तोत्रं श्रीकालिकायै समर्पितम् अस्तु।

स्तोता -
**डॉ युवराज भट्टराई**
समवाप्तसाहित्याकादेमियुवपुरस्कारः

# "संस्कृत कथा मञ्जरी"

## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

## "अथ राजपुत्र-भल्लूककथा" (१)





**डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम**

तदन्तरमेकदा राजकुमारः आखेटार्थं वनं प्रति निर्गतः। निर्गमनसमये अपशकुनः समभूत्। तस्मिन्नवसरे मन्त्रिपुत्रेण बुद्धिसागरेणोक्तं- भो जयपाल! अद्य आखेटं मा गच्छ, महानपशकुनो दृश्यते। तेनोक्तं- भो राजकुमार! बुद्धिमता पुरुषेणानिष्टोऽपशकुनः प्रत्ययेन द्रष्टव्यः। तेन निवारितोऽपि तद्वचमनादृत्य राजपुत्रो निर्गतः। पुनर्निगमनसमये तेन भणितं- भो जयपाल! तव विनाशकालः समायातः, अन्यथा एवं बुद्धिर्नोत्पद्यते। ततो राजकुमारो वनं गत्वा बहून् श्वापदान् व्यापाद्य कृष्णसारं दृष्ट्वा तमनुगतः महदरण्यं प्रविष्टो यावत् पश्यति तावत् सर्वेऽपि सैन्यवर्गः नगरमार्गे लग्नः। कृष्णसारोऽपि तत्रादृश्यो जातः। स्वयमेकाको तुरगारूढः सरोवरम् अग्रेवणम् अपश्यत्। तत्राश्वदवतीर्णो वृक्षशाखायाम् अश्वं निबध्य जलपानं विधाय यावत् वृक्षाधःस्थत्तमायाम् उपविशति। तावदतिभयङ्करः कश्चिदेको व्याघ्रः समागतः। तं सहसा दृष्ट्वा अश्वो बन्धनं त्रोटयित्वा पलायमानो नगरमार्गमगमत्। राजकुमारोऽपि भयाद्वेपमानः शाखामालम्बा वृक्षामारूढः तत्र पूर्वारूढं भलूकमेकं दृष्ट्वा पुनरत्यन्तं भयं प्राप्तः। अथ तेन भलूकेन भणितं- भो राजकुमार! त्वं मा भैषोः अद्य मम शरणागतस्त्वम्, अतः एव अहं किमपि अनिष्टं न करिष्यामि। मां विश्वस्य व्याघ्रादपि न भेतव्यम्। राजकुमारेण भणितं- भो ऋक्षराज! सत्यमेवाहं तव शरणागतः, विशेषतो भयभीतः अतः पालनीय एव यतो हि महत् पुण्यं शरणागतरक्षणात् भवति।

तदा भल्लूकेन समाश्वासितो राजपुत्रः। व्याघ्रोऽपि वृक्षाधः समायतः। ततः सूर्य्योऽप्यस्तं गतः। रात्रो अतिश्रान्तं राजपुत्रं यावत् निद्रां समायाति, तावत् त्वं वृक्षाधः प्रतिष्यसि, एहि समाङ्के निद्रां कुरु एवमुक्तवतः भल्लूस्याङ्के निद्रां गतः राजपुत्रः। तदा व्याघ्रो वदति- भो भल्लूक! अयं ग्रामवासी, पुनरपि मृगयाऽस्मान् निहनिष्यति, शत्रुरयं किमर्थमङ्के निवेशितः? यतोऽयं मानुषः. त्वयोपकृतोऽपि अयम् अपकारमेव करिष्यति, तस्मात् अमुम अधः पातय, अहमेन भक्षियित्वा सुखेन गमिष्यामि। त्वमपि निजाश्रमं गच्छ।भल्लूकेनोक्तम्- अयं यादृगोऽपि भवतु, परं मम शरणागतः अमुं न पातयिष्यामि। शरणागतमारणे महत् पापम्। तदन्तरं राजपुत्रो विनिद्रो जातः। भल्लूकेनोक्तं- भो राजकुमार! अहं क्षणं निद्रां करिष्यामि, त्वमप्रमत्तः तिष्ठ। तेनोक्तं- तथा भवतु। ततो भल्लूको राजपुत्रसमीपे निद्रां गतः। तदा व्याघ्रेणोक्तं- भो राजकुमार! त्वमस्य विश्वासं मा कुरु, यतोऽयं नखायुधः। अयञ्च चलचित्तो दृश्यते, तस्मादस्य प्रसादोऽपि भयङ्करः। अयं त्वां मत्तो रक्षित्वा स्वयमत्तुम् इच्छति, अतस्तमं भल्लूकधः पातय, अहमेनं भक्षयित्वा गमिष्यामि, त्वमपि निजनगरं गच्छ। तत् श्रुत्वा राजपुत्रो यावत् तमधः पातयति, तावद्भल्लूको वृक्षात् पतनमन्तरा शाखामन्यामवलम्बितवान्। पुनस्तं दृष्ट्वा राजपुत्रो भयमाप। भल्लूकोऽप्यदत्- भो पापिष्ठ! किमर्थं बिभेषि? यत् पुराऽर्जितंकर्मं तत् त्वया भोक्त्वव्यमस्ति। तर्हि त्वं 'स-से-मि-रा' इति वदन् पिशाचाविष्टो भव इति शापं दत्तवान्। ततः प्रभातमासीत्। व्याघ्रस्तस्मात् निर्गतः। भल्लूकोऽपि राजकुमारं शप्त्वा निजस्थानमगात्। राजकुमारोऽपि 'स-से-मि-रा' इति वदन् पिशाचाविष्टो भूत्वा वनं परिभ्रमति स्म।

# प्रो. अजितकुमारचतुर्वेदीः रामायण-अनुसन्धान-परिषदोऽस्य मुख्यपरामर्शकरूपेण मनोनीतः



**नवदेहली/वाराणसी, २१ अगस्त २०२६, राघव नाथ झा।** रामायण-अनुसन्धान-परिषदा काशीहिन्दू-विश्वविद्यालयस्य कुलपतिः प्रो. अजितकुमारचतुर्वेदीः परिषदः मुख्यपरामर्शकरूपेण मनोनीतः। प्रो. चतुर्वेदीस्य आध्यात्मिक-सांस्कृतिक-साहित्यिकपृष्ठभूमिं तथा शिक्षाक्षेत्रे उच्चशैक्षणिकप्रशासने च दीर्घकालीनम् अनुभवं दृष्ट्वा परिषदः एषः निर्णयः कृतः।

परिषदः न्यासी डॉ. देवदत्तशर्मा अवदत् यत् प्रो. अजितकुमारचतुर्वेदीः समृद्धायाम् आध्यात्मिक-साहित्यिकपरम्परायां जातः। तस्य पितामहः आचार्यः परशुरामचतुर्वेदी हिन्दी-साहित्यस्य प्रसिद्धः विद्वान्, आलोचकः तथा सन्तसाहित्यस्य प्रमुखः अध्येता आसीत्। प्रो. चतुर्वेदीस्य परिवारः पूज्यसन्तस्य स्वामिनः अखण्डानन्दसरस्वतीमहाराजस्य आध्यात्मिकपरम्परया सह अपि सम्बद्धः आसीत्।

डॉ. शर्मणा उक्तं यत् प्रो. चतुर्वेदीस्य समृद्धा आध्यात्मिक-सांस्कृतिक-साहित्यिकपृष्ठभूमिः, ज्ञानम्, कौशलं च दृष्ट्वा तं मुख्यपरामर्शकरूपेण मनोनीतुं परिषदः निर्णयं कृतवती। तस्य मार्गदर्शनेन रामायण-अनुसन्धान-परिषदः कार्येषु नूतना दिशा, नवीनश्च वेगः प्राप्स्यते इति विश्वासः व्यक्तः। प्रो. अजितकुमारचतुर्वेदीः शिक्षाक्षेत्रे तथा उच्चशैक्षणिकप्रशासने महत्त्वपूर्णं योगदानम् अकरोत्। सः भारतीयप्रौद्योगिकीसंस्थानस्य, रुड़की इत्यस्य, निदेशकत्वेन सेवां कृतवान् तथा काशीहिन्दूविश्वविद्यालये आचार्यरूपेण अपि कार्यं कृतवान्। सम्प्रति सः काशीहिन्दूविश्वविद्यालयस्य २९तमः कुलपतिरूपेण विश्वविद्यालयस्य नेतृत्वं करोति।

परिषदः महासचिवः कुमारसुशान्तः प्रो. अजितकुमारचतुर्वेदीं मुख्यपरामर्शकरूपेण मनोनीतं प्रति अभिनन्दनानि शुभकामनाश्च अर्पितवान्। सः अवदत् यत् प्रो. चतुर्वेदीस्य अनुभवेन, विद्वत्तया मार्गदर्शनेन च परिषदः त्रयः प्रमुखाः ध्येयाः—श्रीसीताजी, साहित्यसृजनं संस्कृतिश्च—इत्येतेषु क्रियमाणानां कार्याणां निश्चयेन अधिकं बलं प्राप्स्यति।

सुशान्तः अवदत् यत् रामायण-अनुसन्धान-परिषद् भारतीयसंस्कृतेः रामायणस्य च व्यापकपरम्परां अनुसन्धानस्य, साहित्यस्य, शिक्षायाः सामाजिकसरोकाराणां च माध्यमेन नवपीढ्यै प्रापयितुं निरन्तरं कार्यं करोति। अतः प्रो. चतुर्वेदीस्य मुख्यपरामर्शकरूपेण परिषदः सह संयोजनं गौरवस्य विषयः अस्ति। तस्य अनुभवः मार्गदर्शनं च परिषदः भाविकार्याणां कृते अत्यन्तं महत्त्वपूर्णं भविष्यति।

### विशेषपरिचयः-आचार्यपरशुरामचतुर्वेदीः— सन्तसाहित्यस्य प्रमुखः अध्येता

परिषदः न्यासी देवदत्तशर्मा प्रो. अजितकुमारचतुर्वेदीस्य पितामहम् आचार्यपरशुरामचतुर्वेदीम् अनुस्मरन् अवदत् यत् तस्य जन्म २५ जुलाई १८९४ तमे वर्षे उत्तरप्रदेशस्य बलियाजनपदस्य जवहीं-ग्रामे अभवत्। सः संस्कृते हिन्दीभाषायाश्च सह हिन्दीभाषायाः विविधासां लोकभाषाणां च विद्वान् आसीत्।व्यवसायेन सः अधिवक्ता आसीत्, किन्तु साहित्यस्य सन्तपरम्परायाश्च अध्ययनक्षेत्रे तस्य प्रमुखं योगदानम् आसीत्। कबीरः, मीराबाई, सन्तपरम्परा, भक्तिसाहित्यं तथा भारतीयसाहित्यस्य सांस्कृतिकपृष्ठभूमिः तस्य अध्ययनस्य प्रमुखाः विषयाः आसन्।

विशेषतः 'मीराबाई-पदावली' इति ग्रन्थस्य संकलनं आचार्यपरशुरामचतुर्वेदीस्य महत्त्वपूर्णेषु साहित्यिकयोगदानेषु एकम् अस्ति। अस्य प्रकाशनं हिन्दी-साहित्य-सम्मेलनेन, प्रयागे, कृतम् आसीत्।डॉ. शर्मणा उक्तं यत् आचार्यचतुर्वेदीः सन्तसाहित्यं केवलं धार्मिकसाहित्यरूपेण न अपश्यत्, अपि तु तस्मिन् निहितं मानवीयचिन्तनं, सामाजिकचेतनां भारतीयसंस्कृतेः विकासं च व्यापकदृष्ट्या अवगन्तुं प्रयत्नम् अकरोत्। तस्य अध्ययनस्य अन्तर्गतं निर्गुण-सगुणभक्तिः, सूफीपरम्परा, नाथसम्प्रदायः इत्यादीनां विविधासां धाराणां व्यापकः सांस्कृतिकदृष्ट्या अध्ययनं कृतम्।

रामायण-अनुसन्धान-परिषदः भारतीयज्ञानपरम्परायाः, रामायणसाहित्यस्य तथा भारतीयसंस्कृतेः अनुसन्धान-संरक्षण-संवर्धनाय निरन्तरं प्रयत्नशीला अस्ति।

# संस्कृतसामान्यज्ञान-संस्कृतगीतप्रतियोगितयोः प्रतिभाभिः प्रदर्शिता मेधा

## मैनपुरीजनपदस्य विजेतारः मण्डलस्तरीयप्रतियोगितायां करिष्यन्ति प्रतिनिधित्वम्





हिमसंस्कृतवार्ताः — उत्तरप्रदेश। उत्तरप्रदेशशासनस्य भाषाविभागान्तर्गतं सञ्चालितेन उत्तरप्रदेशसंस्कृतसंस्थानेन, लखनऊ आयोजितायां 'संस्कृतप्रतिभाखोज–२०२६' इत्यस्याः योजनायाः अन्तर्गतं मैनपुरीजनपदस्य श्रीएकरसानन्द-आदर्श-संस्कृत-महाविद्यालयस्य सत्सङ्गसभागारे जनपदस्तरीय-संस्कृत-सामान्यज्ञानप्रतियोगिता (बालवर्गः) तथा संस्कृतगीतप्रतियोगिता च भव्यतया सम्पन्ने।

कार्यक्रमस्य शुभारम्भः सरस्वतीविग्रहे माल्यार्पणेन, दीपप्रज्वालनेन मङ्गलाचरणेन च अभवत्। देववाणी-संस्कृतस्य प्रचार-प्रसारं संरक्षणं च तथा नवपीढ्यां भारतीयसनातनज्ञानपरम्परायाः प्रति अनुरागस्य जागरणं लक्ष्यीकृत्य आयोजितयोः प्रतियोगितयोः जनपदस्य विभिन्नेभ्यः शिक्षणसंस्थानेभ्यः आगतैः छात्रैः छात्राभिश्च उत्साहपूर्वकं सहभागिता कृता।संस्कृतसामान्यज्ञानप्रतियोगितायां प्रतिभागिनां तीक्ष्णमेधा तथा भारतीयसंस्कृतेः संस्कृतशास्त्रस्य च विषये तेषां ज्ञानं प्रदर्शितम्। अपरतः संस्कृतगीतप्रतियोगितायां प्रतिभागिनां सुमधुरस्वरैः, शुद्धसंस्कृतोच्चारणेन भावपूर्णप्रस्तुत्या च सभागारः संस्कृतगीतानां मधुरध्वनिना गुंजितः।

**निष्पक्षमूल्याङ्कनानन्तरं निर्णायकमण्डलेन उभयोः प्रतियोगितयोः विजेतॄणां घोषणा कृता।**

संस्कृतसामान्यज्ञानप्रतियोगिता — बालवर्गः
प्रथमः — कार्तिकेयमिश्रः
द्वितीयः — अभिषेकदीक्षितः
तृतीयः — अखण्डमिश्रः

संस्कृतगीतप्रतियोगिता
प्रथमः — आदर्शमिश्रः
द्वितीयः — जयतिदीक्षिता
तृतीयः — दिव्यांशी

महाविद्यालयस्य प्राचार्यः प्रो. रामबदनपाण्डेयः तथा संयोजिका काव्यांशीमिश्रा च विजेतृभ्यः प्रतिभागिभ्यः शुभकामनाः प्रदत्तवन्तौ। ताभ्यां सूचितं यत् उभयोः प्रतियोगितयोः प्रथम-द्वितीय-तृतीयस्थानप्राप्ताः सर्वे प्रतिभागिनः आगामी सितम्बरमासे आयोज्यमानायां मण्डलस्तरीयप्रतियोगितायां मैनपुरीजनपदस्य प्रतिनिधित्वं करिष्यन्ति। प्राचार्यः प्रो. रामबदनपाण्डेयः स्वीयाशीर्वचने संस्कृतस्य महत्त्वं प्रतिपादयन् उक्तवान् यत् संस्कृतं केवलं भाषा न, अपितु भारतीयानां संस्कारस्य ज्ञानपरम्परायाश्च महत्त्वपूर्णा आधारभूमिः अस्ति।

बालप्रतिभानां संस्कृतगीत-श्लोकप्रस्तुतिभिः संस्कृतस्य उज्ज्वलभविष्ये विश्वासः सुदृढः भवतीति तेन प्रतिपादितम्।

प्रतियोगितयोः निर्णायकत्वेन डॉ. अंकितासिंहः तथा डॉ. श्याममोहनमिश्रः निष्पक्षतया दायित्वं निर्वहितवन्तौ। संयोजिका काव्यांशीमिश्रा उत्तरप्रदेशसंस्कृतसंस्थानस्य प्रति कृतज्ञतां प्रकटयन्ती निर्णायकमण्डलस्य, शिक्षकाणां, अभिभावकानां तथा सर्वेषां प्रतिभागिनां प्रति आभारं व्यक्तवती। कार्यक्रमस्य अन्ते विजेतृभ्यः उज्ज्वलभविष्यस्य शुभकामनाः प्रदत्ताः। राष्ट्रगानेन कल्याणमन्त्रपाठेन च कार्यक्रमस्य विधिवत् समापनम् अभवत्। अस्मिन् अवसरे महाविद्यालयस्य प्राध्यापकाः, संस्थासदस्याः तथा बहुसंख्याकाः संस्कृतानुरागिणः उपस्थिताः आसन्।